ISSN- 2320- 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## दशमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

स्वामी जपसिद्धानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः -** डॉ. राकेशदाशः
**सम्पादकमण्डली -** डॉ. वेङ्कटरमणभट्टः, डॉ. गोपीकृष्णन् रघुः, डॉ. नागराजभट्टः, डॉ. नीरजकुमारभार्गवः, स्वामी वेदार्थानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Venkataramana Bhat, Dr. Gopikrishnan Reghu, Dr. Nagaraja Bhat, Dr. Neeraj Kumar Bhargave, Swami Vedarthananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः -** कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : prajnaloka.rkmvu@gmail.com

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०२२
Year of Publishing– 2022

मूल्यम्– ₹ ७०/–
Price– ₹ 70/-

Powered by LaTeX 2ε

Printer : Rama Art Press, 6/30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | केनोपनिषद उपलब्धे तलवकारब्राह्मणे अन्तर्गतत्वम्, सायणभाष्यकर्तृकत्वञ्च<br>ब्रह्मचारी शुभदीपः | 1 |
| ४. | कैवल्योपनिषद्दिशा कैवल्यस्वरूपविमर्शः<br>शैवाल आचार्यः | 11 |
| ५. | अस्तिसिचोऽपृक्ते<br>राकेशदाशः | 19 |
| ६. | स्थानेऽन्तरतमः<br>सुजितमाइतिः | 28 |
| ७. | वाक्यविज्ञानम्<br>कृष्णगोपालपात्रः | 38 |
| ८. | न्यायवैशेषिकयोः तन्त्रयुक्तिविमर्शः<br>लक्ष्मीनारायणराउः | 47 |
| ९. | Cultural life as reflected in *ViṣṇuSmṛti*<br>Anusrita Mandal | 62 |

# निवेदनम्

प्रज्ञालोकाख्याया विबुधमुदातानिकायाः पत्रिकाया इयं दशमी सञ्चिका। पूर्ववत् लेखानां चयने विशेषज्ञानां मतम् एव अङ्गीकृतम्। प्राबन्धिकानां परिचयम् अज्ञातवन्तः समीक्षकाः प्रबन्धानां समीक्षाम् अकुर्वन्। तेषां समीक्षकाणां कृते कार्तज्ञ्यं प्रकटयामः।

अस्मिन् अङ्के महामहोपाध्यायस्य आचार्यसायणस्य भाष्यव्याप्तिम् आलम्ब्य केनोपनिषदि विषयद्वयम् आलम्ब्य विचारितवान् ब्रह्मचारी शुभदीपः। गौणीषु उपनिषत्सु कैवल्योपनिषद् विशिष्टा। तत्र प्रतिपादितं कैवल्यस्वरूपम् आचार्योपाह्वेन शैवालेन विततं स्वीयप्रबन्धे। अस्तिसिचोऽपृक्ते इति सूत्रस्य अर्थविषये विवदन्ते वैयाकरणमूर्धन्याः। तत्र निर्णयपरकः बन्ध दाशोपाह्वेन राकेशेन। माइति इत्युपाह्वेन सुजितेन स्थानेऽन्तरतमः इति सूत्रम् आलम्ब्य स्वीयविचाराः प्रकटिताः। वाक्यविषये प्राच्यपाश्चात्त्यविदुषां मतानि समालोचितवान् पात्रोपाह्वः कृष्णगोपालः। तन्त्रयुक्तयः विविधशास्त्रेषु विचारिताः। न्यायवैशेषिकशास्त्रोक्ताः तन्त्रयुक्तयः सुष्ठु सम्प्रकाशिताः राउ इत्युपाह्वेन लक्ष्मीनारायणेन। विष्णुस्मृतौ सामाजिकजीवने जीवनमूल्यानां सांस्कृतिकांशानां च प्रकाशनं कृतं मण्डलोपाह्वया अनुसृतया।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयप्रतिकुलाधिपतिभ्यः, पूज्यकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE
(Formerly known and Ramakrishna Mission Vivekananda University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।
ॐ शान्तिः शान्तिः शान्तिः॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published after some delay. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by

our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Swami Atmapriyananda
Pro-Chancellor & Secratary

Belur Math
4 July 2022

# केनोपनिषद उपलब्धे तलवकारब्राह्मणे अन्तर्गतत्वम्, सायणभाष्यकर्तृकत्वञ्च

**ब्रह्मचारी शुभदीपः** *

## १. उपक्रमः

चतुर्वेदभाष्यकारेण श्रीसायणाचार्येण वेदार्थप्रकाशनाम्नि[१] सुविस्तृतं यज्ञपरकं[२] भाष्यम् अकारि, इत्ययं विषयस्तु नः सर्वेषां विदितप्रायम् एव। न केवलं भाष्यम्, अपि तु तेन सुधानिधिरिति[३] नाम्ना अनेकेषां विषयाणाम् उपरि ग्रन्थोऽपि अरच्यत। परन्तु अखिलस्य वेदस्य भाष्यं तेन कृतं, न वेति केवलं शाखागतत्वेन एकस्याम् एव भाष्यरचनायां तेषां प्रवृत्तिरिति विचारणीयम् एव। एवं हि सामवेदस्य सहस्रशाखाभेदेषु इदानीम् उपलभ्यमानासु त्रिसृषु शाखासु जैमिनीयशाखीयस्य तलवकारब्राह्मणे उपलभ्यते इयं केनोपनिषद् इति। तत्र प्रमाणम्– "Anandagnana tells us that our Upanishad belonged to the Sakhas of the Talavakaras."[४] इति।

तत्र सायणाचार्यस्य नाम्नि उपलभ्यमानासु मातृकासु प्रायः अष्टादशोपनिषदाम् उपरि भाष्यम् अस्तीति लक्ष्यते। ते च प्रबन्धान्ते संयोज्यन्ते। अपि च विद्वन्मण्डलेषु सायणाचार्यकृतानां वेदभाष्याणां सम्पूर्णतया अनुपलब्धेः तस्य वैपुल्यहेतुकसंशयवशाद् वा येन केनचिद् वा कारणेन कैश्चन वेदविद्वद्भिरुपनिषत्सु तेन भाष्यं न कृतम् इति गृहीतं, तद्यथा "Sayana commented upon almost all kinds of Vedic texts, particularly of the Samhitas, the Brahmanas and the Aranyakas. But it is interesting to note that, as far as we know, Sayana had not composed any commentary on the Upanishads."[५]। अन्यैः कैश्चित् पण्डितैः शाखान्तरगतस्य तत्तदुपनिषदां भाष्यं सायणाचार्यैः कृतम्

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

१ वेदार्थप्रकाश इत्यभिधानेन यद्यपि अस्माभिः प्रबन्धे सर्वत्र व्यवह्रियते, तथापि अस्य मूलं तु सायणमाधवीयवेदार्थप्रकाश इति। यतो हि सायणाचार्यकृतभाष्यमातृकादिषु एवमेव परिलक्ष्यते, प्रबन्धे स्थानसङ्कोचनाय वेदार्थप्रकाश इति नाम्नि भाष्यमिदमुद्ध्रियते।

२ अधियज्ञं व्याख्यायते इति सायणाचार्यैः ऋग्वेदभाष्योपक्रमणिकायां प्रतिज्ञातम्।

३ तद्यथा यज्ञतन्त्रसुधानिधिः, पुरूषार्थसुधानिधिः, प्रायश्चित्तसुधानिधिः, आयुर्वेदसुधानिधिरित्यादयः।

४ Muller, p.lxxxix

५ Kar, p.5

इति[६] प्रतिपादितम्। परम् अद्याप्येतस्य विषयस्य निश्चयो न जातः।

## २. शोधसमस्या

अथ केनोपनिषदि सायणाचार्यस्य भाष्यं वर्तते इति कैश्चिद्[७] उक्तम्, परन्तु अद्यापि प्रकाशितरूपेण अप्रकाशितमातृकारूपेण वा अस्य प्राप्तिर्जायते न वेति संशयस्थलम्। एवञ्च श्रीशङ्करभगवत्पादैः केनोपनिषत्पदभाष्ये अस्याः मूलस्थानं यन्निर्दिष्टम्, तेन विद्वत्सु काचन शङ्का समजनि, यतो हि तेषां निर्देशानुसारं मूलब्राह्मणे अस्या उपनिषदः नैव उपलब्धिर्जायते। एवञ्च मुख्यरूपेण अत्र समस्याद्वयम्– आद्यं तावत् केनोपनिषद उपलब्धे तलवकारब्राह्मणे अन्तर्गतत्वम्, अपरं तु केनोपनिषदि सायणभाष्यस्य अस्तित्वविषये निरूपणम् इति।

## ३. प्रकृताध्ययनविचारविषयभूतं वाङ्मयादिकम्

केनोपनिषद् इति मुख्यासु दशोपनिषत्सु प्रश्नप्रतिवचनमुखेन गुरुशिष्यसंवादमाध्यमेन प्रस्तुता उपनिषद् इति। अस्यास्तु मूलं सामवेद एव। सहस्रवर्त्मा सामवेद इति प्रसिद्धिः। ततश्च पौराणिकानां मतानुसारेणापि सामवेदस्य सहस्रशाखाः वर्तन्ते। अपि च पतञ्जलिमहर्षिकृतमहाभाष्यग्रन्थेऽपि सामवेदस्य सहस्रशाखानां निर्देशो दृश्यते। जैमिनीयगृह्यसूत्रेषु सामवेदस्य त्रयोदशशाखानाम् उल्लेखो लभ्यते। अपि चास्य वेदस्य अष्टाधिकसहस्रशाखानाम् उल्लेखो दिव्यावदानग्रन्थे परिलक्ष्यते। तत्र चरणव्यूहे[८] सामवेदस्य सप्तमुख्यशाखानां निर्देशोऽस्माभिः परिलक्षितः, यथा– राणायनीया, शात्यमुग्रा, कलापी, महाकलापी, शार्दुली, लाङ्गलायनी अपि च कौथुमः। तत्र कौथुमशाखाया इतोऽपि पञ्चभेदा आसन्, यथा– आसुरायणी, वातायनी, प्राञ्जलिद्वैतभृत्, प्राचीनयोग्या, नैगेया च। परन्तु इदानीम् एतासु शाखासु कौथुमी, जैमिनीया, राणायनीया इति तिसृणाम् एव उपलब्धिर्जायते। अपि च देशभेदे शाखाभेदस्यापि निर्देशश्चरणव्यूहे उपलभ्यते। तत्र कौथुमशाखा बङ्गदेशे गुर्जरप्रदेशे च, जैमिनीयशाखा तु कर्णाटकप्रदेशे, अपि च राणायनीयशाखाया विस्तारो महाराष्ट्रे आसीद् इति। एवं सत्यव्रतसामश्रमिणा सामवेदस्य

---

६ Modak, p. 10

७ Vedarthananda, p. 24

८ चरणव्यूहः, पृ. १६

त्रयोदशशाखानाम् उल्लेखः कृतः। तत्र प्रायः दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवात् हीयमानविवेकविज्ञानहेतुतया सर्वाश्शाखाः कालेन कवलिताः, द्वित्रा एव अधुना विराजन्ते, ते च कौथुम-जैमिनीय-राणायणीयाः। इदं तु सामान्येन वक्तुं शक्यते यत् प्रतिशाखं ब्राह्मणं भिद्यते। अत्र जैमिनीयशाखानुसारेण ब्राह्मणत्रयं वर्तते, तानि च जैमिनीयब्राह्मणम्, जैमिनीयार्षब्राह्मणम्, जैमिनीयोपनिषद्ब्राह्मणं तलवकारब्राह्मणम् इति वा। अस्यैव तलवकारब्राह्मणस्य अन्तिमभागः केनोपनिषद् इति। तत्रापि च चतुर्थाध्यायस्य दशमानुवाकाद् आरभ्य एकादशानुवाकपर्यन्तभाग एव केनोपनिषत्। द्वादशानुवाकस्तु पुनरुपासनरूपः।

## ४. प्रकृतविषये निर्णयाय आश्रियमाणा प्रक्रिया

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायाद् उभयथा समस्याद्वयस्य समाधाने काचित् प्रक्रियास्माभिरत्र अनुसृता। तत्र प्रथमं तावद् मातृकालयेषु अप्रकाशितमातृकाणाम् अनुसन्धानं कृत्वा सायणाचार्यकृतवेदार्थप्रकाशनाम्ना उपलभ्यमानानां मातृकाणां संग्रहः कृतः। ततश्च मुख्यतया अध्युपनिषदम् अवधानं दत्त्वा तासां सूची सज्जीकृता। एवञ्च केनोपनिषदुपरि विदुषां मतानां सङ्कलनपूर्वकं तत्र विप्रतिपत्तिस्थलानि दृष्टानि, एवं शोधप्रवृत्तौ अस्माभिरस्या उपनिषदः प्रमुखरूपेण शङ्काद्वयं प्राप्तम् इति।

## ५. केनोपनिषद उपलब्धे तलवकारब्राह्मणे अन्तर्गतत्वम्

एवम् अस्या उपनिषदो विषये पूर्वोत्तरपक्षयोरुपस्थापनं क्रियते। यतो हि मोक्षमूलारमहोदयस्य[१] अपि च वेबार्-महोदयस्य मतेन भगवत्पादकृतनिर्देशेन सह उपलब्धस्य मूलब्राह्मणस्य साम्यं न प्रतिभाति, अतः संशयः।

### ५.१. पूर्वपक्षः

एवम् अत्र अस्या उपनिषदः विषये मोक्षमूलारमहोदयस्य मतम् उद्ध्रियते– "Sankara, in his commentary, tells us that this Upanishad forms the ninth adhyaya of a Brahman, or, if we take his word quite literally, he says, 'the beginning of ninth adhyaya is "the

[१] प्रबन्धे सर्वत्र Max-muller-इत्यस्य स्थाने मोक्षमूलारभट्ट इत्यभिधानेन अभिहितम्, यतो हि तैः स्वयम् एव "भट्टमोक्षमूलारेण सम्पादितः" इत्येवं रूपेण स्वग्रन्थे प्रयुक्तः। (ऋग्वेदसंहिता (प्रथमभागः), पृ. xxxi )

Upanishad beginning with the words *Keneṣitam*, and treating of how the Highest Brahman has to be taught…" [१०] इति। तेषां मते ब्राह्मणस्य यन्मूलनिर्देशो भगवत्पादैः कृतः, तेन साक्षाद् अभिधा गृह्यते चेत्, न सामञ्जस्यं प्रतिभाति। यतो हि उपनिषद् इयं "केनेषितं पतति" इत्यनेनारभ्य, ब्रह्मविद्यां प्रस्तौति।

एवं ब्राह्मणेऽस्मिन् पूर्वस्मिन् अध्यायाष्टके सामविषयकाणि उपासनानि उक्तानि, तदेव उद्धरता मोक्षमूलारमहोदयेन विस्तारितं यत्– "In the eight preceding adhayas, he tells us, all the sacred rites Or sacrifices had been fully explained, and likewise the meditation (Upasana) on the prana (vital breath) which belongs to all these sacrifices, and those meditations also which have reference to fivefold and sevenfold Samans." [११]इति। एवम् अत्र यथा गायत्रसामविषये उपदिष्टं श्रुत्या, तद्वत् सामवेदीये छान्दोग्योपनिषद्भाष्येऽपि [१२] पाञ्चभक्तिकं साप्तभक्तिकं वा साम्नः प्रतिपादनं दृश्यते। तद् एव प्रतिपादयन् मोक्षमूलारः कथयति यत्– "All this would naturally form the subject of Sama Veda Brahmana, and we find portions corresponding to the description given by Sankara in the Chhandogyopanishad, e.g. the fivefold Saman, II, 2; the seven fold Saman, II, 8; the Gayatra-sama, III, 12, 1." [१३] इति। तस्य मते सामवेदीयब्राह्मणानाम् अयं सामान्यप्रतिपादनविषयः, तत्र उदाहरणत्वेन भगवत्पादीयमुण्डकोपनिषद्भाष्येऽपि अस्माभिः परिलक्षितं यत्– "साम पाञ्चभक्तिकं साप्तभक्तिकं च स्तोभादिगीतिविशिष्टम्" [१४] इति, एतस्य पाञ्चभक्तिकस्य विषये सुब्रह्मण्यशास्त्रिणा भाष्यव्याख्याने उक्तं वर्तते यत्– "पाञ्चभक्तिकम् इति। हिङ्कार-प्रस्तावो-द्गीथ-प्रतिहार-निधनाख्याः पञ्च भक्तयोऽवयवा यस्य तत्तथोक्तम्।" [१५], एवञ्च साप्तभक्तिकविषये– "साप्तभक्तिकमिति। हिङ्कार-प्रस्तावो-द्गीथ-प्रतिहारो-पद्रव-निधनाख्याः सप्त

---

१० Muller, 1900, p. lxxxix

११ Muller, 1900, p. lxxxix

१२ छा.उ.

१३ ibid

१४ मुण्ड.उ.शां.भा. २.१.६

१५ उपनिषद्भाष्यम्, पृ. १४४.

भक्तयो यस्य तत्तथोक्तम्।"[१६] इति।

एवं स्थितौ उपनिषदो मूलब्राह्मणे उपलब्धिविषये पुनः शङ्काम् उत्पादयता मोक्षमूलारेण उक्तं यत्– "All this had formerly to be taken on trust, because no Brahmana was known containing the Upanishad". इति। तत्र एतैः डा. वार्णेलमहोदयस्य प्रसङ्गं स्वयम् एव उत्थाप्य, स्वीयशङ्कायाः समाधानम् अपि दत्तं, वार्णेलमहोदयेन यद् उपनिषत्सहितं ब्राह्मणं प्राप्तं तद् भगवत्पादकृतस्थाननिर्देशनेन सह किञ्चित् सामञ्जस्यं भजते। एवं वार्णेलमहोदयस्य पत्रम् अपि उद्धृतं यत्– "It appears to me that you would be glad to know the following about the Kena Upanishad, as it occurs in my MS. of the Talavakara Brahmanam." (Letter dated Tanjore, Dec 8, 1878) एवञ्च वार्णेलमहोदयेन अस्या मूलनिर्देशविषये केचिद् बिन्दवः प्रदर्शिताः, ते च– उपनिषद्ब्राह्मणम् इति नाम्ना अस्याः शाखाया अन्तिमं ब्राह्मणम् इदम्।

एवञ्च तत्र १४५ काण्डानि सन्ति, तत्रादौ गायत्रसामविषये प्रतिपादनं दृश्यते। १३४ इति संख्यकानि काण्डानि वंशाख्यानि, केनोपनिषत् पुनः १३५ इत्यस्मात् १४५ इति संख्यककाण्डपर्यन्तं वर्तते। परन्तु तत्र १३९ तमं काण्डं तु "आशा वा इदमग्र आसीत्" इत्यादि वाक्येन आरभते।

मातृका तु भगवत्पादीयोपनिषदा यथायथं प्रतिभाति, केवलं न मूलनिर्देशविषये। उपक्रमोपसंहारौ न यथानिर्देशं प्रतिभातौ।

एवं वार्णेलमहोदयस्य मतेन मोक्षमूलारमतेन च इयम् उपनिषत् चतुर्थाध्यायस्य दशमानुवाके प्राप्यते, न तु नवमाध्याये यथा भगवत्पादैः भाष्योपोद्घाते प्रतिपादितम्।

## ५.२. सिद्धान्तः

एवं पूर्वपक्षे अस्माभिरस्य उत्तरत्वेन काचिद् भिन्ना दृष्टिः प्रदर्श्यते। यतो हि पुरा वेदश्श्रुतिमूल एवासीत्। तत्र लेखनपरम्परा बहुधा समागतेति विदुषां मतम्। तत्र वेदविभागो महर्षिणा वेदव्यासेन कृतः इति सर्वैर्वेदनिष्णातैर्विदितः। एवं विभागे कृतेऽपि अध्यायादिविभागोऽवान्तरकालीन इति निश्चयेन वक्तुं शक्यते। यत्र ऋषिपरम्परा न लुप्ताः तत्र विभागस्तु यथावत्, अन्यत्र विभागः संशयास्पदम्।

अपि च वेदविभागे कृतेऽपि उपनिषद् इदमित्थमिति वक्तुं न शक्यते। यतो

[१६] तदेव

हि वेदस्यान्तभागो वेदान्त उपनिषद् वेति यद्यपि लोकरूढिः, तथापि प्रायः मुख्योपनिषदस्सर्वा न अन्तभागे। क्वचित् संहितायां यथा ईशोपनिषत्, एवं ब्राह्मणभागे छान्दोग्योपनिषत्, बृहदारण्यकोपनिषच्च, एवमारण्यकभागे ऐतरेयोपनिषत्, तैत्तिरीयोपनिषच्च। प्रकृतप्रसङ्गे केनोपनिषदिति ब्राह्मणस्यैव प्रायः अन्ते राजते।

एवञ्च मुख्योपनिषदाम् आचार्यकृतभाष्यदिशा विश्लेषणं क्रियते चेत्, सामान्येनेदं निर्णेतुं शक्यते, यत् - आचार्यैरुपनिषद्रूपेण यावान् अंशः स्वीकृतः, तदंशस्यैव अद्य उपनिषत्त्वेन ग्रहणम्। एवम् आचन्द्रतारककीर्तिहेतुभूतस्य भगवत्पादसिद्धान्तितस्य अद्वैतराद्धान्तस्य एवं महिमा वर्तते, येन प्रधानमल्लरूपेण विराजितानामितरेषां सिद्धान्तानां नाममात्रेण पर्यवसानं सञ्जातम्। किमु वक्तव्यं तैः प्रस्थानत्रयेषु मुख्यत्वेन परिगणितानामुपनिषदामेवं प्रसिद्धिः।

एवम् उपनिषदो विभागसमये प्रायः तैर्यत्र ब्रह्मविद्या करतलन्यस्तत्वेन प्रतिपादिता तस्या एव ग्रहणं कृतमिति। मध्ये क्वचिद् उपासनम् अपि प्रतिपादितं यथाश्रुति निर्देशितम्। उपासनविषये भगवत्पादीयमतं यथा– "उपासनं नाम समानप्रत्ययप्रवाहकरणम्" [१७], अपि च "उपासनं च यथाशास्त्रं तुल्यप्रत्ययसन्ततिरसङ्कीर्णा च अतत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च।" [१८], एवञ्च "उपासनं तु यथाशास्त्रसमर्थितं किञ्चिद् आलम्बनम् उपादाय तस्मिन् समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरितम्– इति विशेषः।" [१९]

अथ अस्याः केनोपनिषद उपोद्घाते भगवत्पादैः कृतस्य भाष्यस्य अवलोकनं क्रियते। तत्र भाष्यं यथा– "केनेषितम्' इत्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः। प्राग् एतस्मात् कर्माण्यशेषतः परिसमापितानि, समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि, कर्माङ्गसामविषयाणि च। अनन्तरं च गायत्रसामविषये दर्शनं वंशान्तमुक्तं कार्यम्। सर्वमेतद्यथोक्तं कर्म च ज्ञानं च सम्यगनुष्ठितं निष्कामस्य मुमुक्षोः सत्त्वशुद्ध्यर्थं भवति।" [२०]

इदानीं भाष्यांशोऽयं प्रतिपदं विचार्यते। प्रथमं तावत् केनेषितम् इत्यस्मात् परब्रह्मविषया श्रुत्या प्रतिपादिता, यद्यपि नवमाध्याये अस्याः उपनिषदारम्भः। एवम् एतस्मात् प्राग् अशेषतः अर्थात् सम्पूर्णरूपेण साकल्येन वा कर्माणि

[१७] ब्रह्मसूत्रशाङ्करभाष्यम्, ४.१.७

[१८] तैत्तिरीयोपनिषत्शाङ्करभाष्यम्, १.३.४

[१९] छान्दोग्योपनिषद्भाष्यम्प्रथमोऽध्यायःप्रथमः खण्डः।

[२०] केनोपनिषत्शाङ्करभाष्योपोद्घातः।

परिसमापितानि प्रतिपादितानीत्यर्थः। समस्तकर्माश्रयभूतस्य प्राणस्य उपासनानि तत उक्तानि। एवञ्च कर्माङ्गसामविषयाणि, अस्मिन् प्रसङ्गे आनन्दगिरिणा उक्तं यत्– "कर्माङ्गसाम पाञ्चभक्तिकं साप्तभक्तिकं च तद्विषयाण्युपासनानि पृथिव्यादिदृष्ट्योक्तानि। प्राणदृष्ट्या गायत्रसामोपासनं च।" [२१] इति। ततश्च शिष्याचार्यक्रमेण वंशस्तदवसानेन ब्रह्मविद्या प्रस्तुता। "सैषा शाट्यायनी गायत्रस्योपनिषद् एवमुपासितव्या" इति मन्त्रेण वंशान्तप्रतिपादनं समाप्य "केनेषितमिति" पराविद्या प्रतिपादिता उपनिषदि। एवं "यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति।" [२२] इति फलश्रुत्या उपनिषद्भागस्समाप्यते।

एवं तैत्तिरीयोपनिषदपि अस्माभिस्समानरूपेण उदारणत्वेन ग्रहीतुं शक्यते। तत्र तैत्तिरीयोपनिषद्भाष्यारम्भे तैस्स्पष्टं निरूपितम्– "नित्यान्यधिगतानि कर्माणि उपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन् ग्रन्थे। इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते।" [२३] इति। अपि च ब्रह्मविद्यां प्रतिपादयन्त्या उपनिषदा कथं शीक्षाध्यायस्य ग्रहणम् इति तत्रापि कारणम् उक्तं– "अर्थज्ञानप्रधानत्वाद् उपनिषदः ग्रन्थपाठे यत्नोपरमो मा भूद् इति शीक्षाध्याय आरभ्यते..." [२४] इति। एवं च शिष्याचार्यमुखेन ब्रह्मविद्यां प्रस्तूय अन्ते उक्तं– "...इति वल्लीद्वयविहिता उपनिषत् परमात्मज्ञां तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत् तपो महद् आस्थाय य एवं वेद, तस्येदं फलं यथोक्तमोक्ष इति।" [२५] इति। एतेन स्पष्टं यद् ब्रह्विद्या प्रतिपादनम् एव उपनिषदां तात्पर्यम् इति भगवत्पादीयसिद्धान्तः।

## ६. केनोपनिषदि सायणभाष्यस्योपलब्धिविचारः

अथेदानीं केनोपनिषदि सायणभाष्यस्योपलब्धिर्वर्तते न वेति विचार्यते। एवञ्च प्रकृतप्रसङ्गे आदौ विदुषां मतम् उद्धृत्य ततश्शङ्काया उपस्थापनं क्रियते, अपि च शङ्कापनाय प्रबन्धेऽस्मिन् याः पद्धतयोऽनुसृताः, ताश्च निरूप्यन्ते।

**शङ्का**

[२१] केनोपनिषत्शाङ्करपदभाष्यम् आनन्दगिरिकृतटीका।
[२२] केनोपनिषत्, ४.९.
[२३] तैत्तिरीयोपनिषच्छाङ्करभाष्योपद्घातः
[२४] तैत्तिरीयोपनिषत्शाङ्करभाष्यम्, १.२.२.
[२५] तैत्तिरीयोपनिषत्शाङ्करभाष्यम्, ३.१०.६.

सामवेदस्य कौथुमशाखाया अष्टब्राह्मणानि वर्तन्ते, जैमिनीयशाखायास्तु ब्राह्मणत्रयम् उपलभ्यते, राणायनीयास्तु केवलं संहितामूलम्। एवं कौथुम-राणायनीय-जैमिनीयशाखानां संहिता प्रायेण समाना। गाने तु भेदः। अधिकौथुमसंहितं सायणाचार्यैः भाष्यं व्यरचि।

एवं स्थितौ बलदेवमहोदयेन स्वीयवेदभाष्यभूमिकायां लिलेख यद् याः काश्च शाखाः वेदस्यासन् सायणाचार्यैः सर्वासाम् उपरि भाष्यं रचितम्। एवञ्च कैश्चित् सायणाचार्यैरुपनिषद्भाष्यं न कृतिम् इति गृहीतम्, यथा– "…as far as we know, Sayana had not composed any commentary on the Upanishads." [२६]

अपि च डि.दयानाथ-महोदयेन क्वचिद् वेदव्याख्यानमालायां सायणाचार्यविषये प्रवचनकाले एवम् उक्तं– वेदस्य सर्वासां शाखानाम् उपरि भाष्यं विरचितं सायणाचार्येण।

अत एवं विद्वदभिप्राये ज्ञाते, अस्मासु शङ्का समजनि, जैमिनीयशाखीयायाः केनोपनिषदः सायणीयं भाष्यं वर्तते न वेति।

**समाधानम्**

एवञ्च शङ्काया निरसनाय, अस्माभिः प्रथमं तावत् मातृकासूचीषु [२७] अनुसन्धानं कृतम् इति। एवञ्च वेदवाङ्मये [२८] प्रकाशितोपनिषद्भाष्यग्रन्थेषु केनोपनिषदो विषये विशेषताया अवधानं दत्त्वा तालिका सज्जीकृता। परन्तु तत्र कुत्रापि केनोपनिषत् सायणभाष्यसहितेति नावलोकितम्।

अपि च मातृकाणां तालिकासज्जीकरणसमये उपनिषन्नाम्ना अनेकासां-- प्रायः अष्टादशानाम् उपनिषदां-- तालिका निर्धारिताः। तेषु द्वित्रा उल्लिख्यन्ते, तद्यथा-- आरण्यक-आरुण्य-कैवल्य-कौशितकी-चैति- जाबालादयः [२९]। अत्रापि अस्या अन्तर्भावो न परिलक्ष्यते।

ततश्च शर्ममहोदयेन [३०] जैमिनीयशाखोक्तब्राह्मणानां सम्पादनकाले अनयोर्भेदः प्रदर्शितः, कथं च ऋषिवंशलोपेन कथं सहस्रवर्त्मनः तिसृषु शाखासु पर्यवसानमित्यपि विस्तारेण प्रतिपादितम्। तैरष्टब्राह्मणेषु [३१]

---

[२६] Kar, p.5.

[२७] Catalogus Catalogorum & New Catalogus Catalogorum.

[२८] Vedic Bibliography

[२९] NCC, XXXVIII, P. 335

[३०] Sharma, 1967. P. 4.

[३१] अष्टौ हि ब्राह्मण ग्रन्थाः..., (छान्दोग्यब्राह्मणम्, पृ. ३.)

षण्णाम् एव सम्पादनं प्रकाशनं च विहितम्, एवञ्च तैरेतेषां सम्पादनात् परं जैमिनीयार्षेय-जैमिनीयोपनिषद्ब्राह्मणस्य च केवलं मूलमात्रस्यैव सम्पादनं कृतम्। एवम् अस्य सम्पादनाय प्रयुक्तमातृकाणां विषयविचारसमये अनेन आभारतं चतसृणाम्, अपि च बहिस्ताद् एकस्या ग्रहणं कृतिम् इति। परन्तु कुत्रापि भाष्यसहिता मातृका नोपलब्धा, किम् उत वक्तव्यम् अस्य सायणीयभाष्यस्य प्राप्तिविषये।

अन्ते एवं निर्द्धारयितुं शक्यते यत् प्रकृते असम्भावनायाः प्राचुर्याद् नेयं केनोपनिषत्सायणीयभाष्यसहितेति।

## ७. शोधनिष्कर्षः

प्रथमस्तावत् आचार्यकृतकेनोपनिषदः सम्बन्धभाष्ये एव मूलनिर्दश इति शङ्काया बीजमिति प्रकृतप्रसङ्गे भाष्यावलोकनेन निरूपितमिति।

द्वितीयस्तु कासाञ्चिदुपनिषदां सायणभाष्यमण्डनं सञ्जातम्। ताश्च १. तैत्तिरीयोपनिषत्,[३२] २. ऐतरेयोपनिषत्,[३३] ३. काण्वशाखीया ईशावास्योपनिषत्,[३४] ४. छान्दोग्योपनिषच्चेति, [३५] चतस्रः। यद्यपि बृहदारण्यकोपनिषदि भाष्यं न लभ्यते, तथापि माध्यन्दिनबृहदारण्यकस्य अंशभूतत्वाद् अस्या उपनिषदोऽपि तदंशत्वम् अनायासेनानुमीयते। एवं लोकरूढिः, काण्वशाखीया बृहदारण्यकोपनिषत् शङ्करभाष्यसंयुक्ता, सायणीया तु माध्यन्दिनशाखायुता। परन्तु अधुना प्रवर्ग्यान्तस्यैव सायणभाष्यं लभ्यते। एवञ्च जैमिनीयोपनिषद्ब्राह्मणमिति नाम्नापि आख्यातस्य तलवकारब्राह्मणस्य सायणीयभाष्यं नास्माभिरुपलब्धमेतावतेति केनोपनिषदि सायणकृतभाष्यं न सम्भावयामः।

## ८. उपसंहारः

अथ प्रस्तुतप्रबन्धे मुख्यरूपेण प्रतिपादितस्य समस्याद्वयस्य समाधानं लक्षणप्रमाणाभ्यां प्रस्तुतम्, एवञ्च अस्या उपनिषदो मूलस्थाननिर्देशप्रसङ्गे काचिद् विशिष्टा दृष्टिरस्माभिरत्र उपस्थापितेति शिवम्॥

---

[३२] उपनिषदियं कृष्णयजुर्वेदीयस्य तैत्तिरीयारण्यकस्य अन्तिमभागः।

[३३] उपनिषदियं ऋग्वेदीयस्य ऐतरेयारण्यकस्य अन्तिमभागः

[३४] उपनिषदियं शुक्लयजुर्वेदीयायाः काण्वसंहितायाः चत्वारिंशाध्यायः।

[३५] उपनिषदियं सामवेदीयस्य छान्दोग्यब्राह्मणस्य अन्तिमभागः।

# परिशीलितग्रन्थसूची


1. *Brāhmaṇasaṃgraha* (Eng.); Samirancandra Chakraborty; Kolkata: Sāhitya Akādemī; 2004.
2. *Caraṇavyūhasūtra*; Śaunaka; Mahīdāsa (comm.); Kāśī Saṃskṛta Granthamālā 132, Varanasi: Caukhāmbhā Saṃskṛta Saṃsthāna, 1994. (4th Edition).
3. *Catalogus Catalogorum* (An Alphabetical Register of Sanskrit Works and Authors), Part 1-3; Aufrecht Theodor; Franz Steiner Verlag Gmbh Wiesbaden; 1962.
4. *Sayana (Maker of Indian literature)*; B. R. Modak; Sahitya Akademi; 1995.
5. *New Catalogus Catalogorum*, (An Alphabetical Register of Sanskrit and Allied works and Authors), Vol XXXVII; Dr. Siniruddha Dash (Ed.); University of Madras; 2015.
6. Do; Vol XXXVIII.
7. Do; Vol XXXIX.
8. *Sacred Books of The East* (by Various Original Scholars) Vol I; F. Max Muller; London: Oxford, 1900.
9. *Sayana's Methodology in Interpreting the Ṛgveda*; Indrani Kar; Kolkata: Sanskrit Pustak Bhandar; 2005.
10. *Sixty Upanishads of the Veda* (Volume 1); Paul Deussen; Motilal Banarsidass; ISBN 978-8120814684.
11. *Vedabhāṣyabhūmikāsaṃgraha*; Sāyaṇa; Baladeva Upādhyāya (ed.); Kāśī Saṃskṛta Granthamālā 102; Varanasi: Caukhāmbā Saṃskṛta Series Office, 1958. (2nd Edition).
12. *Vedera Paricaya*; Yogiraj Basu; Kolkata: Farma K. L. Private Limited; 2009. (edition 3, language Bengali).
13. *Vedic Bibliography* (Government Oriantal Series, Class B, No 14, First Part- Sixth Part); R. N. Dandekar; Poona: Bhandarkar Oriantal Research Institute; Second Edition, 1986-2004.


**Thesis & Articles**


1. *"Īśataittirīyopaniṣadoḥ Śaṅkarasāyaṇabhāṣyayoḥ Samīkṣātmakamadhyayanam"* (Doctoral Thesis); Swami Vedarthananda; Belur Math: Department of Sanskrit and Philosophy, Ramakrishna Mission Vivekananda Educational and Research Institute, 2020.

2. *"Oldest Dated Manuscript of Sāyaṇa's commentary on the Sāmaveda"*; P. K. Gode; Annals of the Bhandarkar Oriental Research Institute, 1938-39, Vol. 20, No. 2 (1938-39), pp. 145-152.<http://www.jstor.com/stable/41688875>
3. *"Madhavacharya and his younger Brother."*; R. Narasimhacharya; Indian Antiquary (A journal of Oriantal Research). Vol XLV; Sri Richard Carnac Temple & Devadatta Ramakrishna Bhandarkar (eds.); Bombay, 1916. <https://indianculture.gov.in/flipbook/32843>
4. *"Development of Sanskrit Literature under Vijayanagara."*; S. Srikanta Sastri; <www.srikanta-sastri.org>

✶ ✶ ✶

# कैवल्योपनिषद्दिशा कैवल्यस्वरूपविमर्शः

शैवाल आचार्यः *

## १. भूमिका

'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्'[२] इति भगवद्गीतोक्तेः ज्ञायते यत् मनुष्याः निरन्तरं कर्मपराः सन्ति, कर्महीनाः क्षणमपि स्वजीवनं परिपालयितुं नार्हाः। कर्म कर्तव्यं चेत् किमर्थमकर्म कृत्वा आत्मानं पापपङ्किले पातयामः, प्रत्युत उच्चतरं कर्म सम्पाद्य उन्नतस्तरं प्रति संगच्छामः। चराचरात्मकेऽस्मिन् प्रपञ्चे धर्मार्थकाममोक्षरूपेषु चतुर्षु पुरुषार्थेषु मोक्ष एव मनुजनूनां परमं चरमञ्च लक्ष्यम्। मोक्षैकपराणां ज्ञानपीयूषपिपासूनां ब्रह्मस्वरूपावाप्तिः एव लक्ष्यम्। तच्च ज्ञानं विना नैव सम्भवति। वेदान्तदर्शनस्य प्रस्थानत्रयेषु उपनिषदनुसारिण्या सरण्या एव ज्ञानमवाप्तुं शक्नुमः। वेदान्तदर्शनतत्त्वस्य दिव्यज्योतिः आवैदिककालादधुनापि देदीप्यमानं भारतवर्षस्य कृत्स्नमध्यात्मसम्पदं प्रभाते प्रस्फुटितकुसुमकलिकावत् विकाशयति। मोक्षैकधनाः तमेव आधारीकृत्य ब्रह्मानन्दं प्राप्नुवन्तः स्वकैवल्यमाप्तवन्तः। सर्वासु उपनिषत्सु ज्ञानमार्गस्य एव कीर्तनं दरीदृश्यते। ज्ञानमार्गेणैव मोक्षेच्छवः कैवल्यं प्राप्नुवन्ति। प्रस्तुतेऽस्मिन् कैवल्योपनिषद्यपि तस्यैव ज्ञानमार्गस्य विजयध्वनिः ध्वनितः। कैवल्योपनिषद्दिशा कैवल्यस्वरूपं मया प्रतिपाद्यते।

अस्याः उपनिषदः कस्मिन् वेदे अन्तर्भावः इति विषये विद्यते विदुषां विमतिः। केषाञ्चन नये इयम् अथर्ववेदीया उपनिषत्, केचित्तु कृष्णयजुर्वेदीया इति ब्रुवन्ति। परन्तु 'यः शतरुद्रियमधीते सोऽग्निपूतो भवति, स वायुपूतो भवति...'[३] इत्यादिमन्त्रे शतरुद्राध्यायस्य अङ्गीकारात् इयं कृष्णयजुर्वेदीया इति निश्चेतुं शक्यते।

## २. कैवल्योपनिषदः परिचयः

अस्यामुपनिषदि अत्यन्तसरलमार्गेण, सुललितभाषया ब्रह्मतत्त्वं प्रतिपादितम्। ब्रह्मावाप्तिः एव अत्र कैवल्यशब्देन व्यपदिष्टः। जिज्ञासुः

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

२ श्रीमद्भगवद्गीता ३.५

३ कैवल्योपनिषत् २५

अश्वलायनः 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं' [४] इत्यादि श्रुत्यनुसारेण समित्पाणिः ब्रह्माणमुपसृत्य 'सदा सद्भिः सेव्यमानां निगूढाम्।' [५] इत्यादिवाक्यैः ब्रह्मविद्यामुपदेष्टुमनुरुन्धे। यया विद्यया अचिरात् सर्वपापं व्यपोह्य विद्वान् परात्परं पुरुषं गच्छति केन मार्गेण सा विद्या आयत्तीकर्तुं शक्यते इति जिज्ञासा।

सर्वपापपाशमुक्तः पितामहः ब्रह्मा योग्यः गुरुः भुत्वा आदौ 'श्रद्धाभक्तिध्यानयोगादवेहि' [६] इति उक्त्वा ततः 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' [७] इति मार्गमुपदिशति। तथाहि, न हि काम्यकर्मसम्पादनेन, न वा सन्तानसमूहेन, न वा धनलाभेन ब्रह्मानन्दतुल्यः आनन्दः प्राप्यते। एषा विद्या अतीवदुर्लभा। तर्हि केन मार्गेण सम्पादयितुं शक्यते इति जिज्ञासायामाह 'श्रद्धाभक्तिध्यानयोगात्' इति। तस्मिन् परमगुरौ श्रद्धा-भक्ति-ध्यानादेव केवलं परात्परं परमेष्टिनं ब्रह्म साक्षात्कर्तुं शक्यते। येषामन्तःकरणं निर्मलं शुद्धसत्त्वम्, येषां रागद्वेषयोः अभावः विद्यते, ते एव यतयः ब्रह्मसाक्षात्कारे समर्थाः। स्वर्गात् परं बुद्धिरूपगुहायां यः विराजते, सः परमात्मा एव तत् ब्रह्म। यतयः सन्न्यासयोगेन अर्थात् भोगादित्यागपूर्वकं संयमाश्रयेण तं द्रष्टुं शक्नुवन्ति। बुद्धिरूपगुहावस्थितोऽपि सः परमात्मा सर्वव्यापी स्वप्रकाशकः। ये तावत् शुद्धसत्त्वाः निर्मलान्तःकरणाः ते एव तं प्राप्नुवन्ति।

ब्रह्मा पुनः उक्तवान् यत् ब्रह्मसाक्षात्काराय अत्याश्रमी भवितव्यम्। अर्थात् ब्रह्मचर्यादिचतुराश्रममतिक्रम्य स्थेयम्। शमदमादिषड्सम्पत्तिः निरन्तरमनुष्ठेयम्। इन्द्रियादीन् अन्तर्मुखान् विधाय मनः निश्चलं कृत्वा सर्वप्रथमं गुरोः वन्दनं कर्तव्यम् 'अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य' [८] इति। यतो हि गुरुरेव ब्रह्मसाक्षात्कारं कारयेत्। ततः हृदि तस्यैव विरज-विशोक-विशुद्ध-आनन्दघनब्रह्मणः ध्यानं कर्तव्यम्। ततः ब्रह्मस्वरूपं प्रतिपादयति–

अचिन्त्यमव्यक्तमनन्तरूपं
शिवं प्रशान्तममृतं ब्रह्मयोनिम्।

---

४ मुण्डकोपनिषत् - १.२.१२

५ कैवल्योपनिषत् १

६ कैवल्योपनिषत् २

७ कैवल्योपनिषत् ३

८ कैवल्योपनिषत् ५

तथादिमध्यान्तविहीनमेकं
विभुं चिदानन्दमरूपमद्भुतम् ॥

[कैवल्योपनिषत् ६]

तथाहि, परमात्मा अचिन्त्यः चिन्तायाः अशक्यत्वात्, अव्यक्तः वक्तुमशक्यत्वात्, अनन्तरूपः रूपाणामानन्त्यात्, शिवः मङ्गलमयत्वात्, प्रशान्तः शान्तः, अमृतः मृत्युरहितः, परन्तु जन्ममृत्युकारणरूपः, आदि-मध्य-अन्तविहीनः स एक एव विभुः, चिदानन्दरूपः चित्स्वरूपः आनन्दमयश्च, अद्भुतः कुत्रापि न स्थित्वापि सर्वत्र विद्यमान् इति तस्य अद्भुतत्वम् ।

आदौ स्वरूपलक्षणं प्रतिपाद्य इदानीं तटस्थलक्षणं प्रतिपादयति–

उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिः तमसः परस्तात् ॥

[कैवल्योपनिषत् ७]

सः चिदानन्दरूपी सर्वकारणकारणः उमासहायः ब्रह्मविद्यायुक्तः इत्यर्थः, अपरस्मिन् पक्षे सृष्टौ मायासहितः इत्यपि अर्थः भवितुमर्हति। स एकोऽपि अर्धनारीश्वरः, स ईश्वरः, सर्वेषां प्रभुः, नियन्ता। स त्रिलोचनः सूर्य-चन्द्र-अग्नयः तस्य त्रीणि लोचनानि। स प्रसन्नवदनः नीलकण्ठः। एवं ज्ञात्वा योगी तं ध्यायति चेत् सर्वकारणे परमब्रह्मणि स विलीनो भवति। तमसमतिक्रम्य सर्वाविद्यामुक्तः भविष्यति।

ततः 'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षर परमः स्वराट्'[९] 'स एव सर्वं यद् भूतं यच्च भव्यम् सनातनम्।'[१०] इत्यादिमन्त्रेण तस्य सर्वमयत्वं प्रतिपाद्य तत्प्राप्त्युपायं वर्णयति–

आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासात् पाशं दहति पण्डितः ॥

[कैवल्योपनिषत् ११]

संसारपाशबद्धः जीवः मायाच्छन्नः। तस्मात् ब्रह्मधारणायां नास्ति तेषां रुचिः ब्रह्मसाक्षात्कारस्य का कथा। तस्मात् आदौ पाशादात्मनः विमोचनं कर्तव्यम्। पण्डिताः पाशरहस्यज्ञातारः 'अहं सर्वभूतात्मा' इति संस्मृत्य तस्मिन् एव

[९] कैवल्योपनिषत् ८
[१०] कैवल्योपनिषत् - ९

निष्ठावन्तः तिष्ठन्ति। पण्डिताः अन्तःकरणमरणिं कृत्वा ओंकारञ्च उत्तरारणिं विधाय पाशं दहन्ति।

आत्मा असङ्गः उदासीनः निर्विकारश्च। मनुष्येषु एव अविद्यावृतः सन् सर्वाणि कार्याणि कारयति अयमात्मा। जीवात्मारूपेण स एव कामासक्तः, विचित्रसुखभोगैः परितृप्तः। जाग्रद्दशायां सुखभोगः मनुष्याणामज्ञानतायाः एव फलम्। जाग्रद्दशायां मनुष्यः स्वकल्पनानुसारं जगत् निर्माय तत्रैव सुखेन रमते, तथैव जाग्रदनुरूपं स्वप्नावस्थायामपि अज्ञानजाते जगति सुख-दुःखभोगपूर्वकं रमते। केवलं सुषुप्तौ अज्ञानान्धकारः जीवं नाभिभूयति। यतो हि उत्पत्तौ एव तस्य विनाशः भवति। सुखस्वरूपे तस्मिन् जीवः सुखमेव अनुभवति।

जीवाः शरीरधारसमनन्तरमेव शुभाशुभकर्मणि लिप्ताः भवन्ति। तस्मादेव जन्ममरणजगति आवर्तिताः भवन्ति। जाग्रत्-स्वप्न-सुषुप्तेरनन्तरं पुनः स्वप्नावस्थातः जाग्रद्दशायां स्थूल-सूक्ष्मशरीरज्ञानमाश्रित्य एव आवर्तिताः भवन्ति। त्रिषु जगत्सु यः रमते सः एव परमात्मा, विचित्रजगतः आधाररूपः पञ्चभूतस्वरूपः।

साक्षात्कृतब्रह्मा योगी परमात्मानम् एवंरूपेण ज्ञात्वा एव तस्य ध्यानं कुर्यात्। जाग्रत्-स्वप्न-सुषुप्तयः तिस्रः अवस्थाः एव ब्रह्मणः मायास्वरूपाः। एवं ज्ञात्वा ज्ञानी मायाबन्धनात् चिराय विमुक्तो भवति। मयि एव सर्वेषां जन्म, मयि एव स्थितिः, मयि एव लयः, अहमेकमेवाद्वितीयः, अणोरणीयान्, महतो महीयान्, पुरातनः, पुरुषः, हिरण्मयः, मङ्गलमयः-- इदं परिपूर्णं ज्ञानमेव ब्रह्मसाक्षात्कारस्य एक एव उपायः। स्वसत्तातः पृथग्दर्शनम् एव अविद्या माया। स्वसत्तातः अपृथग्दर्शनम् एव कैवल्यम्। वेदेषु अहम् एक एव वेदः, वेदान्तः वेदवित्। ज्ञानसमूहेषु अहम् एक एव ज्ञातव्यः। नास्ति मम पापं, नास्ति मम पुण्यं, नास्ति मम जन्म, नास्ति मम मृत्युः। इन्द्रियबुद्धिः नैव स्पृशति माम्। नास्ति तत्र भूमिः, न जलम्, न अनलम्, न अनिलम्, न वा आकाशम्-- गुहाशयी निष्कलखण्डहीनः अद्वितीयः परमात्मारूपी अहम् इति एवं ज्ञातव्यः।

एवं कैवल्यस्वरूपं सम्यक् विज्ञाप्य शतरुद्राध्यायाध्ययनेन किं फलम् इति अन्तिममन्त्रेण विवृणोति– 'यः शतरुद्रियम् अधीते सोऽग्निपूतो भवति, स वायुपूतो भवति, स आत्मपूतो भवति, स सुरापानात् पूतो भवति, स ब्रह्महत्यापूतो भवति, स सुवर्णस्तेयं पूतो भवति, स कृत्याकृत्यात् पूतो भवति, तस्माद् अविमुक्तम् आश्रितो भवत्वित्याश्रमी सर्वदा सकृद् वा जपेत्।

अनेन ज्ञानम् आप्नोति संसारार्णवनासनम्। तस्माद् एवं विदित्वैनं कैवल्यं पदम् अश्नुते कैवल्यं पदम् अश्नुते ॥' [११] इति।

शतरुद्राध्यायी अग्निशुद्धः, वायुशुद्धः, आत्मशुद्धः, मद्यपानजनितपापशुद्धः, कर्माकर्मजनितपापशुद्धः भवति। ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थाश्रमान् अतिक्रम्य सर्वदा तेन सह योगयुक्तः सन् अविच्छिन्नतया शतरुद्री यजनीया।

इदं ज्ञानं भवति चेत् भीषणतरङ्गरङ्गसङ्कुलसंसारार्णवोऽनायासेन तरितुं शक्यः। कैवल्यदशायामेव 'अहमेव आत्मा' 'अहमेव ब्रह्म' एतादृशं ज्ञानं भवति। कैवल्यमेव ब्रह्मज्ञानस्य पराकाष्ठा इति।

## ३. कैवल्योपनिषदि अन्यासामुपनिषदां प्रभावः

ज्ञानमार्गमुन्मोचयितुमेव उपनिषदां प्रवृत्तिः। सर्वासु उपनिषत्सु बहवः विषयाः यद्यपि उपन्यस्ताः तथापि तत्र ज्ञानमार्गस्यैव प्रधानतया कीर्तनं दृश्यते। ब्रह्मणः एकमेवाद्वितीयत्वम्, जीवः ब्रह्मस्वरूपः इत्यादयः विषयाः सर्वासु एव उपन्यस्ताः। कैवल्योपनिषत्पठनेन ज्ञायते यत् सर्वासामुपनिषदां ब्रह्मप्रतिपादकानि वाक्यानि एकत्र संकलितानि। एवं प्रतिभाति यत् पितामहः ब्रह्मा तत्र तत्र उपनिषत्सु व्यस्ताः ब्रह्मप्रतिपादकमन्त्रमुक्तयः एकत्र संकलय्य स्रजं निर्माय अश्वालायनाय प्रदाय तस्य एकनिष्ठतया जपितुमुपदिदेश। तेनैव अश्वलायनस्य कैवल्यं भविष्यति - अणोरणीयान्, महतो महीयान् तस्मिन् एव विराजते। इदं जगत्, अस्मिन् वर्तमानानि सर्वाणि वस्तुनि तस्यैव पुरातनपुरुषस्य क्रीडणकस्वरूपाणि। केवलं स एव सत्यः, सनातनः, पुराणः। ब्रह्मणा सह तस्य अभेदज्ञानं 'अहं ब्रह्माऽस्मि' इत्यादयः अनुभवाः भविष्यन्ति।

इदानीं तत्र तत्र उपनिषन्मन्त्रैः सह कैवल्योपनिषन्मन्त्राणां कुत्र कुत्र साम्यमिति सोदाहरणं संपश्यामः। कैवल्यप्राप्तये बहवः उपायाः अस्यामुपनिषदि उक्ताः। विविधासु उपनिषत्स्वपि कैवल्यप्रापकाः मन्त्राः विद्यन्ते। तद्यथा महानारायणोपनिषदि ब्रह्मणः ज्यायस्त्वम् अणीयस्त्वं च वर्णयित्वा तत्प्राप्त्युपायं ब्रवीति–

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्त्वमानशुः।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥

[महानारायणोपनिषत् १०.५]

तत्समानः मन्त्र एव अस्यामुपनिषदि प्राप्यते। अथ कैवल्यप्राप्त्युपायं निर्वर्ण्य

---

[११] कैवल्योपनिषत् २४

के तत् प्राप्तुं शक्नुवन्ति इति वर्णनावसरे मुण्डकोपिनिषदः मन्त्रमुद्धरति -

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥
[मुण्डकोपनिषत् ३.२.६]

विविधासु उपनिषत्सु ब्रह्मज्ञानप्राप्तये विधयः उक्ताः - विविक्तदेशः गन्तव्यः, सुखासनेन समग्रीवशिरशरीरः सन् सकलानि इन्द्रियाणि शमयित्वा गुरोः प्रणामं विधाय ब्रह्मजिज्ञासा कर्तव्या। अस्यामुपनिषदि अपि ते एव नियमाः उक्ताः–

विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरः शरीरः।
अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥
[कैवल्योपनिषत् ५]

ब्रह्मजिज्ञासायाः प्राक् गुरोः अर्चनमवश्यकर्तव्यम्। मुण्डकोपनिषदि आम्नातं– तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।'[१२] इति। अर्थात् ब्रह्मज्ञानाय ब्रह्मनिष्ठस्य गुरोः गमनं कर्तव्य। गुरोः हवनकार्यसौकार्याय समित्पाणिः गन्तव्यः। एषः एक प्रकारः गुरोः अर्चनायाः। अस्यामुपनिषदि गुरोः प्रणामः विधेयः इति आम्नातम्। सर्वासु उपनिषत्सु गुरोः माहात्म्यमेतदर्थमेव उक्तं यत् गुरुः एव ब्रह्मज्ञानेन सह शिष्यस्य सम्पर्कं जनयति। विना गुरुं शिष्यस्य ब्रह्मज्ञानं नैव सिध्यति। उक्तं च भगवता भाष्यकारेण श्रीशङ्कराचार्येण गीताभाष्ये 'असम्प्रदायवित् सर्वशास्त्रविदपि मूर्खवदेव उपेक्षणीयः।'[१३] इति। अतः ब्रह्मज्ञानप्राप्तेः प्राक् गुरोः वन्दना अवश्यकर्तव्या। कीदृशं ब्रह्म मनसि ध्येयमिति ब्रह्मणः स्वरूपं तत्र तत्र उपनिषत्सु उपन्यस्तम् - 'शान्तं शिवमद्वैतम्'[१४], 'महान्तं विभुमात्मानम्'[१५], 'एकमव्यक्तमनन्तरूपं विश्वं पुराणं'[१६] चेति। अस्यामुपनिषद्यपि उच्यमानं ब्रह्मणः स्वरूपं तदनुसारि एव। तथाहि–

हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम्।
अचिन्त्यव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्।

---

[१२] मुण्डकोपनिषत् १.२.१२
[१३] श्रीमद्भगवद्गीताशाङ्करभाष्यम् १३.२
[१४] माण्डुक्योपनिषत् ७
[१५] कठोपनिषत् १.२.२२
[१६] महानारायणोपनिषत् १.१.७

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्॥
[कैवल्योपनिषत् ६-७]

निर्गुणं निष्कलं ब्रह्म अत्रापि वर्णितम्। अत्र नीलकण्ठेन सह तुलनं विशषः दृश्यते। उमासहायः परमेश्वरः मायासहितः ज्ञानसहितः वा इति बोधयितुम् उक्तम्।

ब्रह्मणः सर्वमयत्वं नारायणसूक्ते उक्तं - 'स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्'[17] इति। कठोपनिषदि आम्नातं - 'एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।'[18] इति। अस्यामुपनिषदि अपि तस्यैव अनुरणनं विद्यते–

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः॥
[कैवल्योपनिषत् ८]

ब्रह्मणः सर्वमयत्वं प्रतिपाद्य तदेव एकः पन्था विमुक्तये इति प्रतिपादयति कैवल्योपनिषदि - 'ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये।'[19] इति। शुक्लयजुर्वेदस्य पुरुषसूक्ते आम्नातं - 'तदेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनाय।'[20] इति। श्वेताश्वतरोपनिषदि पुरुषसूक्तस्यैव मन्त्रः विद्यते। [21] अस्यामुपनिषदि अस्यैव अनुकरणं विद्यते। ब्रह्मणः स्वरूपमुक्त्वा ब्रह्मज्ञानिनः स्वरूपवर्णनाप्रसङ्गे

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥
[श्रीमद्भगवद्गीता ६.२९]

गीतावचनम् अनुसृत्य तथा 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चत्मानं...॥'[22] इति ईशावास्योपनिषन्मन्त्रमनुसृत्य कैवल्योपनिषदि आम्नातं–

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
सम्पश्यन् ब्रह्म परमं याति नान्येन हेतुना॥

---

[17] नारायणसूक्तम् १२
[18] कठोपनिषत् २.२.९-१०
[19] कैवल्योपनिषत् ९
[20] पुरुषसूक्तम् ३१.१९
[21] श्वेताश्वतरोपनिषत् ३.८
[22] ईशावास्योपनिषत् ६

[कैवल्योपनिषत् १०]

यः सर्वेषु भूतेषु आत्मानम् आत्मनि च सर्वभूतं पश्यति स एव परमं ब्रह्म गच्छति इति अस्यार्थः। अर्थात् सर्वत्र समदर्शनवान् एव ब्रह्मपदं प्राप्नोति। बह्वीषु उपनिषत्सु उपासनाप्रकारः उक्तः। केन प्रकारेण उपासना कर्तव्या अस्मिन् विषये कठोपनिषदि शरीररूपकमाश्रित्य आम्नातं–

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥

[कठोपनिषत् १.३.३-४]

अर्थात् मनुष्यशरीरं रथः, अस्य रथस्य रथी आत्मा, बुद्धिः सारथिः, मनः प्रग्रहः, इन्द्रियाणि हयाः मन्तव्याः। बुद्धिरूपेण सारथिना मनोरूपग्रहग्रहेण इन्द्रियरूपाः हयाः आकर्षणीयाः सर्वदा, येन शरीररूपः रथः युक्तेन मार्गेण गत्वा रथिनम् आत्मानं यथास्थानं प्रापयति। अस्मिन् प्रसङ्गे मुण्डके आम्नातं–

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत्॥

[मुण्डकोपनिषत् २.२.४]

प्रणवं धनुरूपेण आत्मानं शररूपेण ब्रह्म च लक्ष्यरूपेण प्रकल्प्य लक्ष्यभेदः कर्तव्यः। किञ्च, तत् अप्रमत्तेन कर्तव्यम्। एवमेव रूपकद्वारेण उपासनोपायं कथयति कैवल्योपनिषत्–

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ज्ञाननिर्मन्थनाभ्यासात् पापं दहति पण्डितः॥

[कैवल्योपनिषत् ११]

अर्थात् ज्ञानी पुरुषः आत्मानम् अधोऽरणिं कृत्वा तथा प्रणवम् ओंकारम् उत्तरारणिं विधाय वारं वारं ज्ञानरूपमन्थनेन स्वकृतं पापं दहति। पापं विनाश्य परं पदं प्राप्नोति इत्यर्थः।

ब्रह्मणः सर्वकारणत्वं तत्र तत्र उपनिषत्सु उपन्यस्तम्। तेषु मुण्डकोपनिषत्स्थं मन्त्रं कैवल्योपनिषदि साक्षादुद्धृतं दृश्यते -

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥

[मुण्डकोपिनिषत् २.१.३, कैवल्योपनिषत् १५]

किञ्च, "अणोरणीयान् महतो महीयान्" [२३] इत्यादि ब्रह्मणः सर्वमयत्वपरकः मन्त्रः कैवल्योपनिषदि दृश्यते–

अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम्।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि॥
[कैवल्योपनिषत् २०]

"अपाणिपादो जवनो ग्रहीता" [२४] इत्यादिमन्त्रस्य च्छाया दृश्यते–

अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः।
अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम्॥
[कैवल्योपनिषत् २१]

ब्रह्मणः शास्त्रैकगम्यत्वं तथा सर्वशास्त्रकर्तृत्वं गीतायां दृश्यते– "वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।" [२५] इति। कैवल्योपनिषदि अस्यैव अनुरणनं दृश्यते– "वेदैरनेकैरहम् एव वेद्यो वेदान्तकृद् वेदविद् एव चाहम्।" [२६] इति। एवम् अन्यासाम् उपनिषदां प्रतिच्छविः पङ्क्तौ पङ्क्तौ एव उपलभ्यते कैवल्योपनिषदि।

## ४. उपसंहारः

कैवल्योपनिषदि कैवल्यस्वरूपं कैवल्यप्राप्त्युपायः तथा अधिकारिस्वरूपः इत्यादयः विषयाः विवृततया उपस्थापिताः। अस्या उपनिषदः अन्यासाम् उपनिषद्भिः साम्यं दरीदृश्यते। केचन मन्त्राः साक्षाद् उद्धृताः। केचन मन्त्राः भावम् आश्रित्य आम्नाताः। अतः उपनिषदां पौर्वापर्यविषये प्रश्नः अनुसन्धानयोग्यः इति शम्।

## परिशीलितग्रन्थसूची

१. *उपनिषत्सञ्चयनम् ईशाद्यष्टोत्तरशतोपनिषदः* ; वी. केशवलालशास्त्री ; दिल्ली- चौखम्बा संस्कृत प्रतिष्ठान; २०१५।

२. *१०८ उपनिषद् (सरल हिन्दी भावार्थ सहित) ब्रह्मविद्या खण्ड*; आचार्य श्रीरामशर्मा; हरिद्वार; २०६१ संवत्।

३. *कठोपनिषत्*; गोरखपुर– गीताप्रेस;२०७० सम्बत्।

४. *मुण्डकोपनिषत्*; गोरखपुर– गीताप्रेस;२०६९ सम्बत्।

[२३] कठोपनिषत् १.२.२०
[२४] श्वेताश्वतरोपनिषत् ३.४
[२५] श्रीमद्भगवद्गीता १५.१५
[२६] कैवल्योपनिषत् २२

५. *कठोपनिषत्*; गोरखपुर– गीताप्रेस;२०७० सम्बत्।

६. *तैत्तिरीयोपनिषत्*; गोरखपुर– गीताप्रेस;२०७० सम्बत्।

७. *श्वेताश्वतरोपनिषत्*; गोरखपुर– गीताप्रेस;२०६८ सम्बत्।

८. *श्रीपञ्चरत्नगीता*; गोरखपुर– गीताप्रेस;२०७० सम्बत्।

९. *ब्रह्मसूत्रशाङ्करभाष्यम् (पूर्णानन्दीय-रत्नप्रभासहितम्)*; ढुण्ढिराजशास्त्री; वाराणसी– चौखम्भा संस्कृत संस्थान;२००४ सम्बत्।

१०. *उपनिषत् संग्रह (बङ्गपुस्तकम्)*; रमारञ्जन मुखोपाध्यायः; कलकाता - ग्रन्थिक संस्करण; १४१५।

✶ ✶ ✶

# अस्तिसिचोऽपृक्ते

राकेशदाशः *

## ०. भूमिका

सूत्रम् इदम् अष्टाध्याय्यां सप्तमाध्याये तृतीयपादे षण्णवतितमं सूत्रम्। प्रक्रियाक्रमे तिङन्ते भ्वादिप्रकरणे विलसतितमां सूत्रम् इदम्। अपृक्तस्य प्रत्ययस्य ईडागमविधायकं सूत्रम्। षड्विधसूत्रेषु विधिसूत्रम् इदम्।

## १. सूत्रगतपदानाम् अर्थः

सूत्रे द्वे पदे वर्तेते। अस्तिसिचः इति प्रथमम्, अपृक्ते इति द्वितीयम्। 'नाभ्यस्तस्याचि पिति सार्वधातुके' (अष्टाध्यायी ८.३.८७) इत्यतः सार्वधातुके इति, 'उतो वृद्धिर्लुकि हलि' (अष्टाध्यायी ८.३.८९) इत्यतः हलि इति, 'ब्रुव ईट्' (अष्टाध्यायी ८.३.९३) इत्यतः ईट् इति पदानि अनुवर्तन्ते। अङ्गाधिकारे इदं सूत्रं पठ्यते। अङ्गात् इति पञ्चम्यन्ततया विपरिणतं पदम् अपि अधिक्रियते। एवं च अनुवर्तनात् परं पूर्णं सूत्रं भवति– 'अस्तिसिचः अङ्गात् अपृक्ते सार्वधातुके हलि ईट्।'

अस्तिसिचः इति लुप्तविभक्तिकं पदम्। अस्ति इति विद्यमानार्थकम् अव्ययम्। अस्ति चासौ सिच् च अस्तिसिच् इति कर्मधारयः। अस्तिसिच् च अस् च अस्तिसिचस् इति समाहारद्वन्द्वः। अस्तिसिचस् इति द्वन्द्वसमासनिष्पन्नात् प्रातिपदिकात् पञ्चमी विधीयते। तस्याः पञ्चम्याः सौत्रः लुक्। तेन अस्तिसिचः इति पदस्य अर्थः भवति विद्यमानात् सिचः अस्-धातोः च इति।[१]

अपृक्तशब्दः एकवर्णविशिष्टस्य प्रत्ययस्य वाचकः।[२] सार्वधातुकशब्दः धातोः विहितस्य तिङः शितः वा प्रत्ययस्य वाचकः।[३]

## २. परिभाषापरिष्कृतः सूत्रार्थः

अस्तिसिचः इति पदे पञ्चमी वर्तते। तेन 'तस्मादित्युत्तरस्य' (अष्टाध्यायी १.१.६७) इति परिभाषासूत्रेण निर्दिष्टाद् उत्तरस्य इति पदद्वयं सूत्रे उपतिष्ठते। अपृक्ते सार्वधातुके हलि इति पदेषु औपश्लेषिकी सप्तमी वर्तते। तेन

---

* सहायकाध्यापकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

[१] वैयाकरणसिद्धान्तकौमुद्याम् अस्य सूत्रस्य वृत्तौ द्रष्टव्यम्

[२] अपृक्त एकाल्प्रत्ययः (अष्टाध्यायी १.२.४१)

[३] तिङ् शित् सार्वधातुकम् (अष्टाध्यायी ३.४.११३)

'तस्मिन्निति निर्दिष्टे पूर्वस्य' (अष्टाध्यायी १.१.६६) इति सूत्रेण निर्दिष्टे पूर्वस्य इति पदद्वयम् उपतिष्ठते। किन्तु अत्र पञ्चमीसप्तम्योः युगपत् प्रयोगः अस्ति, कार्यिसूचकस्य च पदस्य अभावः वर्तते इति कृत्वा सप्तमी अत्र षष्ठ्यर्था इति स्वीक्रियते।[४]

ईट् इत्यस्य टकारस्य 'हलन्त्यम्' (अष्टाध्यायी १.३.३) इति सूत्रेण इत्संज्ञा भवति, 'तस्य लोपः' (अष्टाध्यायी १.३.९) इति सूत्रेण च तस्य इत्संज्ञकस्य टकारस्य लोपः भवति। एतेन ईट् टित् इति सिध्यति।

तेन 'अस्तिसिचोभ्यां निर्दिष्टाभ्याम् उत्तरस्य सार्वधातुकस्य अपृक्तस्य हलः ईट्' इति सूत्रं सम्पद्यते। सूत्रे षष्ठ्याः टितः च उच्चारणं वर्तते इति 'आद्यन्तौ टकितौ' इति परिभाषासूत्रेण आदिः इति पदम् अपि उपतिष्ठते। सार्वधातुकस्य अपृक्तस्य हलः इति पदेषु अवयवावयविभावषष्ठी। तेन सूत्रस्य स्वरूपं भवति– 'अस्तिसिचोभ्यां निर्दिष्टाभ्याम् उत्तरस्य सार्वधातुकस्य अपृक्तस्य हलः आदिः अवयवः ईट्' इति।

विद्यमानात् सिचः अस्-धातोः च अव्यवहितपरवर्तिनः सार्वधातुकसंज्ञकस्य अपृक्तस्य हल्-रूपस्य प्रत्ययस्य ईट् आगमः भवति इति सूत्रस्य अर्थः।

## ३. उदाहरणम्

षिध गत्याम् इति धातोः कर्तृविवक्षायां लुङि, अडागमे, प्रथमपुरुषैकवचनविवक्षायां तिपि, च्लौ, च्लेः सिचि, सिचः इडागमे, लघूपधगुणे, ति इत्यस्य इकारलोपे 'असेध् इस् त्' इति दशायाम् इदं सूत्रं प्रवर्तते। अत्र विद्यमानात् सिचः अव्यवहितपरवर्ती 'त्' इति सार्वधातुकः प्रत्ययः, अपृक्तसंज्ञकः, हल् च। तस्मात् त् इत्यस्य आद्यवयवः ईट् भवति। तेन 'असेध् इस् ईत्' इति भवति। ततः 'इट ईटि' इति सिचः सकारस्य लोपे इकार-ईकारयोः दीर्घैकादेशे असेधीत् इति रूपं भवति।

एवं च अस्-धातोः कर्तृविवक्षायां लङि, आडागमे, आटः अकारस्य च वृद्ध्येकादेशे, प्रथमपुरुषैकवचनविवक्षायां तिपि, शपि, शपो लुकि, ति इति इकारस्य लोपे 'आस् त्' इति दशायाम् इदं सूत्रं प्रवर्तते। अत्र अस्-धातोः अव्यवहितपरवर्तिनः अपृक्तस्य सार्वधातुकस्य हल्-रूपस्य प्रत्ययस्य 'त्' इत्यस्य ईडागमः क्रियते। तेन आस् ईत्, ततः आसीत् इति रूपं जायते।

## ४. प्रत्युदाहरणम्

सूत्रे अस्ति इति पदस्य अभावे सिचः परस्य अपृक्तस्य सार्वधातुकस्य

[४] तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्य इति सूत्रयोः भाष्यं द्रष्टव्यम्

हल्-रूपस्य प्रत्ययस्य ईट् स्यात्। तेन भू-धातोः कर्तृविवक्षायां लुङि, अडागमे, प्रथमपुरुषैकवचनविवक्षायां तिपि, च्लौ, च्लेः सिचि, सिचः 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति लुकि, ति इति इकारस्य लोपे 'अभू त्' इति दशायां 'प्रत्ययलोपे प्रत्ययलक्षणम्'[५] इति परिभाषासूत्रानुसारं सिचः परवर्तिनः अपृक्तस्य सार्वधातुकस्य हलः विहितं कार्यं सिचः लोपे कृतेऽपि स्यात्। अथवा लुकः स्थानिवद्भावेन सिच्त्वम् आदाय ईट् अपि वक्तुं शक्यते। तद्वारणाय विद्यमानात् सिचः परस्य एव आगमः, न तु अविद्यमानात् इति सूचयितुम् अस्तिपदम्। एतेन अस्ति इति शब्दः अस्-धातोः वाचकः इति कथयन्तः निरस्ताः।

अपृक्ते इति पदाभावे एध्-धातोः कर्तृविवक्षायां लुङि, आडागमे, आटः एकारस्य च वृद्ध्येकादेशे, प्रथमपुरुषैकवचनविवक्षायाम् आत्मनेपदे त-प्रत्यये, च्लौ, च्लेः सिचि, सिचः इडागमे, 'ऐध् इस् त' इति दशायाम् इदं सूत्रं प्रवर्तते। अत्र त-प्रत्ययस्य अपृक्तताभावात् नास्य प्रवृत्तिः।

हलि इति पदाभावे एध्-धातोः कर्तृविवक्षायां लुङि, आडागमे, आटः एकारस्य च वृद्ध्येकादेशे, उत्तमपुरुषैकवचनविवक्षायाम् आत्मनेपदे इट्-प्रत्यये, च्लौ, च्लेः सिचि, सिचः इडागमे, 'ऐध् इस् इ' इति दशायाम् इदं सूत्रं प्रवर्तते। अत्र इ-प्रत्ययस्य हल्-रूपताभावात् नास्य प्रवृत्तिः।

सूत्रे सार्वधातुके इति पदस्य प्रयोजनं नास्ति।[६] किन्तु पूर्वसूत्राद् अनुवर्तमानम् इदं पदं 'रुदश्च पञ्चभ्यः' इत्यादिषु उत्तरसूत्रेषु अपेक्षितम् इति कृत्वा अत्रापि अनुवर्तते।

**५. काशिकाशयः**

काशिकाकारस्य मते तु अत्र सूत्रस्य अर्थः अन्यथा कल्प्यते। इदं सूत्रम् अङ्गस्य इति अधिकारे पठ्यते। तेन अङ्गस्य इति पदम् अपि पञ्चम्यन्ततया विपरिणतम् अत्र अनुवर्तते। ततः अस्तिसिचः अङ्गात् निर्दिष्टाद् उत्तरस्य अपृक्तस्य सार्वधातुकस्य हलः ईट् इति सूत्रार्थः भवति। अत्र अङ्गात् इत्यस्य विशेषणम् अस्तिसिचः इति पञ्चम्यन्तस्य एकदेशः सिचः इति। तेन 'येन

---

[५] ननु 'न लुमताङ्गस्य' इति निषेधस्य सत्त्वात् अत्र प्रत्ययलक्षणं कार्यं न स्यात्। इह सिचः लुक् वर्तते। ईट् च अङ्गकार्यम्। 'अङ्गस्य' इत्यधिकारे पाठात्। तेन लुका लुप्तं सिचं निमित्तीकृत्य प्रत्ययलक्षणं कार्यं वक्तुं न शक्यते। अतः पक्षेऽस्मिन् अस्वारस्यात् लोपरूपस्य लुकः स्थानिवद्भावम् आश्रित्य इह ईट् वक्तव्यः

[६] 'अपृक्तसार्वधातुकस्येति प्राचोक्तं त्वयुक्तम्। ऐधिषि इत्यादावतिव्याप्तेः, सार्वधातुकग्रहणव्यावर्त्यालाभाच्च।' इति प्रकृतसूत्रव्याख्यानावसरे तत्त्वबोधिन्याम्।

विधिस्तदन्तस्य' इति सूत्रेण सिचः इत्यस्य तदन्तविधौ सिजन्ताद् अङ्गाद् इति लभ्यते। तेन अस्तेः अङ्गात्, सिजन्तात् च अङ्गात् अव्यवहितस्य उत्तरस्य अपृक्तस्य सार्वधातुकस्य ईट् इति सूत्रार्थः सम्पद्यते। तन्नये तु भू-धातोः लुङि 'अभू त्' इति दशायाम् अङ्गस्य सिजन्तताभावाद् एव ईडागमः न।

ननु अस्-धातोः लुङि, अस्-धातोः स्थाने 'अस्तेर्भूः' इति सूत्रेण आदिष्टस्य भू इत्यस्य स्थानिवद्भावेन अस्-रूपतया 'अभू त्' इति स्थिते ईडागमः प्राप्नोति। तद्वारणाय 'आहिभुवोरीट्प्रतिषेधः' इति वार्तिकम् आश्रियते। ब्रू-धातोः स्थाने आदिष्टस्य आह इत्यस्य स्थानिवद्भावेन ब्रूभावम् आश्रित्य आह इत्यस्मात् परस्य थलः, अस्-धातोः स्थाने आदिष्टस्य भू इत्यस्य च स्थानिवद्भावेन अस् इत्यस्मात् परस्य प्राप्तः ईट् प्रतिषिध्यते। तेन ब्रू-धातोः लटि, कर्तृविवक्षायां मध्यमपुरुषैकवचने, 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इति सूत्रेण ब्रू इत्यस्य आह् इत्यादेशः, सिपः थलादेशे च 'आह् थ' इति दशायाम्, आह् इत्यस्य स्थानिवद्भावेन 'ब्रुव ईट्' इति सूत्रेण ईट् प्राप्नोति। प्रकृतसूत्रेण ईडागमे कर्तव्ये वार्तिकेन प्रतिषेधाद् ईट् न भवति। एवम् 'अभू त्' इत्यत्र भू इत्यस्य स्थानिवद्भावेन प्राप्तः ईट् अपि प्रतिषेधात् न भवति इति समाधानम्।

**६. भाष्याशयः**

वस्तुतः इदं वार्तिकं भाष्यकारैः 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रे उल्लिखितम्। तत्र च प्रकृतसमस्ययोः वार्तिकमुखेन समाधानम् उक्त्वा 'आहेस्तावन्न वक्तव्यः' इत्युपक्रम्य वार्तिकं प्रत्याख्यातम्।

'आहस्थः' इति सूत्रेण झलादौ प्रत्यये आहः हकारस्य थकारः विधीयते। यदि थलः ईट् भवति तर्हि झलादौ प्रत्यये परे थकारविधानं व्यर्थं स्यात् थलः थकारादित्वाभावात्। 'आहस्थः' इति सूत्रस्य भूतपूर्वझलादेः ईट् इति व्याख्यानेन थकारविधानस्य सार्थक्यम् इति च न वक्तव्यम्। तत्र कारणद्वयम् उच्यते–

१. णलादीनां पञ्चानाम् अपि स्थानिभूतानां समेषां तिबादिथसन्तानां झलादितया भूतपूर्वगत्या तेषाम् अपि ग्रहणं सम्भवेत्। तेन सर्वेषु अपि णलादिषु परतः आहः थादेशप्रसङ्गः।

२. 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इति सूत्रम् अकृत्वा आचार्यः 'ब्रुवः पञ्चानामादित आथो ब्रुवः' इत्येव सूत्रं कुर्यात्।

एतेन 'आहस्थः' इति ज्ञापकाद् आहः परस्य ईडागमः न भवति इत्येव

आचार्यस्य अभिप्रायः गम्यते।

तथैव भूधातोरपि स्थानिवद्भावनिषेधः न वक्तव्यः। तथाहि, 'भवतेश्चापि न वक्तव्यः। अस्तिसिचोऽपृक्ते इति द्विसकारको निर्देशः। अस्तेः सकारान्तादिति।' अस्य तात्पर्यं तु 'अस्तिसिचोऽपृक्ते' इति सूत्रस्य शरीरं तु 'अस्तिस्सिचोऽपृक्ते' इति। अत्र सकारः मध्यमणिन्यायेन अस्ति इत्यनेन सिचा च सम्बध्यते।[७] अस्तिस् इत्यस्य तु सकारान्तस्य अस्-धातोः, स्-सिच् इत्यस्य सकाररूपः यः सिच् तस्माद् इत्यर्थः। एतेन सकारान्ताद् अस्तेः परस्य ईट्, विद्यमानात् सिचः परस्य ईट् इति व्याख्यानेन वार्तिकं गतार्थम् इति वार्तिकस्य प्रयोजनं निराकृतं भाष्यकारेण। एतेन अभूत्, अगात्, अपात् इत्यादौ सिचः लुकि, लुकः स्थानिवत्त्वेन 'सिचः परस्य ईट्' अत्रापि प्राप्नोति इति आपत्तिः अपि अपास्ता भवति।

## ७. भाष्याशये विप्रतिपत्तयः

वस्तुतः भाष्यकारस्य द्विसकारको निर्देशः इति वाक्यस्य तात्पर्यं किम् इति विषये विवदन्ते वैयाकरणतल्लजाः। कुत्र अयं सकारः प्रक्षेपणीयः कथं तस्य निर्वाहः इति विषये त्रिधा मतम् उपलभामहे।

### ७.१. माधवाचार्यस्य मतम्

माधवाचार्याणां मतेन[८] अस्ति इति विद्यमानार्थकेन अव्ययेन सिचस् इत्यस्य कर्मधारये विद्यमानात् सिचः इति अर्थलाभः। अयं पक्षः पूर्वम् एव उपस्थापितः।

तन्मते, अस्तिसिचः इत्यत्र द्वन्द्वे सिच् इत्यस्य अल्पाच्कत्वात् अभ्यर्हितत्वात् च पूर्वनिपातः स्यात्। सिचः बहुविषयतया तस्य अभ्यर्हितत्वम्। तथा सति यस्य पूर्वनिपातः प्राप्तः तस्य पूर्वनिपातम् अकृत्वा अस्तिसिचः इति उच्चारणसामर्थ्यात् तन्त्रेण च अस्ति इत्यस्य विद्यमानः इति अस्-धातुः इति चार्थः लभ्यते। यदि इत्थं न स्यात् तर्हि सूत्रकारस्तु सिजस्भ्याम् इति वदेत्। ननु, सिजस्भ्याम् इत्युच्यते चेत् आदादिकस्य 'अस भुवि', भौवादिकस्य 'अस गतिदीप्त्यादानेषु', दैवादिकस्य 'असु क्षेपणे' इति त्रयाणाम् अपि धातूनाम् अस्-रूपतया अविशेषेण सर्वेषाम् अपि ग्रहणं स्याद् इति चेन्न। भौवादिक-दैवादिकयोः शप्-श्यन्-भ्यां सार्वधातुकस्य अपृक्तस्य व्यवधानात् तत्र ईटः अप्रसङ्गेन न दोषः। अतः सिच् च अस् च सिचस् इति

[७] प्रकृतवाक्यस्य व्याख्याने उद्द्योते

[८] शब्दकौस्तुभे माधवाचार्याणां मतं सङ्गृहीतम्

समाहारद्वन्द्वः। तत् च लुप्तपञ्चमीकं पदम्। अस्ति च सिचस् च इति विग्रहे कर्मधारये अस्तिसिचस् इति पदं साधु। ननु चकारस्य पदान्तस्य 'चोः कु' इति कुत्वं, 'झलां जशोऽन्ते' इति जश्त्वं च भवेत् इति चेन्न। 'छन्दोवत् सूत्राणि भवन्ति' इति नियमेन 'अयस्मयादीनि च्छन्दसि' इति सूत्रेण अस्तिसिच् इत्यस्य भसंज्ञा क्रियते। तेन पदसंज्ञायाः बाधात् कुत्वं जश्त्वं च निवार्यते।

तेन लुप्तात् सिचः परस्य ईट् निवार्यते, तथा च 'अस्तेर्भूः' इत्यनेन भूभावेन नष्टास्-भावाद् अस्-धातोः परस्य च न ईट् इति उभयथा समस्या परिहृता भवति।

एषां मते भाष्यकारस्य द्विसकारको निर्देशः इति वचनं तु प्रौढिवादः इति निर्देशितम् इति भाति। तेषां मते द्विसकारको निर्देशः इत्युक्ते 'अस्स्तिसिचः' इति अस् इत्यतः परं सकारस्य प्रश्लेषः। तथा सति श्तिप् न सिध्येत्। श्तिप् धातोः एव विधीयते। धातुश्च अस् इति। अस्-स् इति निर्देशे सकारेण धातोर्व्यवधानात् श्तिप् असम्भवः।

## ७.२. शब्दकौस्तुभमतम्

शब्दकौस्तुभे तु भाष्यकारस्य द्विसकारको निर्देशः इति वचनम् 'अस्तिसिचस्स्' इति व्याख्यातम्। अत्र च सिचस्स् अपृक्ते इति स्थिते सन्धौ सिचोपृक्ते कथम् इति प्रश्नः। अत्र द्विधा समाधानम् उच्यते।

प्रथमं तावत् 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तस्य पदस्य अन्त्यवर्णस्य लोपे अस्तिसिचस् अपृक्ते इति दशायां सस्य रुत्वोत्वाभ्यां रूपं सिध्यति इति प्रथमः पक्षः। अस्मिन् पक्षे तु दोषद्वयम्। 'अस्तिसिचस्स्' इति पदं न, 'अस्तिसिचस्' इति पदम्। तेन 'संयोगान्तं यत् पदं तदन्तस्य लोपः' इति सकारलोपः न सङ्गच्छते इति प्रथमो दोषः। कृते च संयोगान्तलोपे तस्य असिद्धतया पूर्वसकारस्य रुत्वोत्वे न भवेताम् इति द्वितीयो दोषः।

अत्र 'संयोगान्तस्य, पदान्तस्य च लोपः स्यात्' इति हि 'संयोगान्तस्य लोपः' इति सूत्रस्यार्थः। तेन न लोपे समस्या। अपि च 'संयोगान्तलोपो रोरुत्वे' इति वार्तिकेन रोरुत्वे कर्तव्ये संयोगान्तलोपस्य असिद्धतानिषेधेन रुत्वोत्वयोः अपि न बाधा इति समाहितम्।

द्वितीये पक्षे तु 'संयोगान्तं यत् पदं तदन्तस्य लोपः' इत्यर्थे स्वीकृते अपि द्वयोः अपि सकारयोः रुत्वोत्वाभ्यां रूपसिद्धिः। तथाहि अस्तिसिचस्स् अपृक्ते इति दशायां 'ससजुषो रुः' इति सूत्रेण उभयोः अपि सकारयोः रुत्वम्। ततः 'अतो रोरप्लुतादप्लुते' इति उभयोः अपि रेफयोः उत्वेन 'अस्तिसिच उउ अपृक्ते' इति दशायाम् सवर्णदीर्घे ऊकारे, अकार-ऊकारयोः

गुणैकादेशे च अस्तिसिचो इति रूपं साधु। ननु अत्र 'अस्तिसिचर् र् अपृक्ते' इति दशायाम् प्रथमस्य रोः ह्रस्वाकाराव्यवहितपूर्वत्वाभावात्, द्वितीयस्य च ह्रस्वाकाराव्यवहितपरत्वाभावात् न उत्वं स्याद् इति चेन्न। 'अतो रोरप्लुतादप्लुते' इति सूत्रे रोः इति जातिनिर्देशः। तेन 'अस्तिसिचर् र् अपृक्ते' इत्यत्र उभयोः रेफयोः समानजातिकत्वात् उभयोः अपि अदव्यवहितपूर्वता अदव्यवहितपरता च सङ्गच्छते। रोः इति जातिनिर्देशे भाष्यकारस्य द्विसकारो निर्देशः इति वचनम् एव प्रमाणं भवतु। ननु 'अस्तिसिचर् र् अपृक्ते' इति दशायां प्रथमस्य एव रेफस्य 'हशि च' इत्यनेन उत्वं स्यात्, न तु परस्य रेफस्य। अत्रोच्यते, 'ससजुषो रुः' इति त्रैपादिकस्य रुत्वस्य असिद्धतया 'हशि च' इति सपादसप्ताध्यायीगतेन सूत्रेण कार्ये कर्तव्ये अत्र हश्-परकत्वाभावे न तस्य सूत्रस्य प्रवृत्तिः।

पुनश्च सिच् च अस् च इति समाहारद्वन्द्वे कृते तत ऊर्ध्वं सकारस्य प्रश्लेषेण अस्तिग्रहणम् अपि प्रत्याख्यातुं शक्यते इति 'द्विसकारको निर्देश' इति भाष्यकारस्य वचनस्य अस्तिग्रहणप्रत्याख्यानपरकता अपि व्याख्यातुं शक्यम्।

## ७.३. नागेशमतम्

उद्द्योतनये तु 'अस्तिस्सिचः' इति क्रमेण सकारस्य सिचः प्राक् निर्देशः न्याय्यः। कौस्तुभनये तु 'सिचस्स्' इति पाठे लोपेन रुत्वेन वा द्वितीयस्य सकारस्य अपगमात् भाष्यकारस्य निर्देशशब्दोच्चारणम् एव व्यर्थं स्यात्। यदि एवम् एव भाष्यकारस्य आशयः तर्हि स 'द्विसकारको निर्देश' इति अनुक्त्वा सकारप्रश्लेषः इत्येव वदेत्। निर्देशो नाम उच्चारणक्रिया एव अत्र स्वीकार्या। तथाहि 'प्रकारान्तरे तु आदेशैरपहारात् सद्वयोच्चारणाभावेन निर्देश इति भाष्यास्वारस्यम्'।

वस्तुतः सूत्रस्य यथोच्चारितत्वाङ्गीकारे अगात् इत्यादौ सिज्लोपे कृते लोपस्य स्थानिवद्भावम् आश्रित्य, उत 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति पक्षं वा आश्रित्य ईट् दुर्वारः एव। तद्वारणाय अपि प्रयासः कर्तव्यः। किन्तु वार्तिककारस्तु तद् अकृत्वा प्राप्तभूभावस्य एव ईटः निषेधम् उपदिशन् सिचः सकाररूपतायाः आवश्यकतां द्योतितवान्। अन्यथा लुप्तसिच्स्थलेऽपि ईड्वारणाय प्रयत्नं कुर्यात्। एतन्नये सकारः सिचः विशेषणं भवति। सकारविशेषणसामर्थ्यात् सकाररूपात् सिचः परस्य एव ईट् इति सूत्रार्थः सम्भवति। इत्थं च द्विसकारको निर्देश इत्यस्य अस्ति इत्यतः परं सिचः इत्यतः पूर्वं च सकारस्य निर्देशः कर्तव्यः इति आशयः। तेन च

मध्यमणिन्यायेन सकारेण सिच् अपि विशेष्यते, अस्तिरपि विशेष्यते इति उभयत्रादोषः।

## ८. उपसंहारः

अत्र सूत्रे काशिकाकारेण भाष्ये प्रत्याख्यातेन वार्तिकेन दोषनिराकरणं कुर्वता भाष्यविरुद्धम् एव समुपदिष्टम् इति चिन्त्यः काशिकाकारस्य पन्थाः।

सिद्धान्तकौमुद्यां तु माधवाचार्याणां मतम् एव अङ्गीकृत्य सूत्रार्थः वर्णितः। तत्र बहुधा विप्रतिपत्तयः। तथाहि–

१. 'अस्तीत्यव्ययेन कर्मधारयः' इति भाष्यानुक्तता।

२. 'ततः पञ्चम्याः सौत्रो लुक्' इति अस्तिसिचः इति अविभक्तिकनिर्देशकल्पनम् अपि भाष्यारूढं न भवति।

३. पञ्चम्याः लुक्, लुप्तस्य च पुनः अर्थानुरोधात् कल्पनम् इति गौरवम् अपि अस्ति।

४. अस्तिसिचस् इत्यत्र 'सिच्', 'अस्' इति पदद्वयम्। तेन सिचः चकारस्य पदान्ततया 'चोः कुः' इति सूत्रेण तस्य कुत्वं, ततश्च 'झलां जशोऽन्ते' इति जश्त्वं दुर्वारम्। तद्वारणाय 'अस्तिसिच्' इत्यस्य पूर्वपदस्य 'अयस्मयादीनि च्छन्दसि' इति सूत्रेण सौत्रं भत्वं कल्प्यते। इदम् अपि भाष्यानारूढं, गौरवाय च कल्पते।

इत्थं दोषचतुष्टयेन सिद्धान्तकौमुदीमतम् अपि वस्तुतः चिन्त्यम् एव।

भट्टोजीदीक्षितपादैः अपि स्वीये शब्दकौस्तुभे भाष्यानारूढत्वाद् इदं मतं प्रत्युक्तम्।[१] एतत् जानद्भिः अपि भट्टोजीदीक्षितपादैः व्याकरणे अव्युत्पन्नानां बालानां सहजतया बोधाय माधवाचार्याणां मतम् आश्रित्य अस्य सूत्रस्य अर्थः निरूपितः इति मन्महे वयम्। तेन सकारप्रश्लेषादिप्रक्रियाबाहुल्यं भवेत्। अस्मिन् मते तु सूत्रगतपदैः एव व्याख्या शक्या इति प्रक्रियालाघवं वीक्ष्य तथा व्याख्यातं स्याद् इति मन्यामहे। बालमनोरमाकारास्तु इदम् एव मतं व्याचख्युः। तत्त्वबोधिनीकाराः माधवीयं मतं समालोच्य शब्दकौस्तुभम् अनुसृत्य 'सिचस्स्' इति व्याचख्युः।

वस्तुतः अत्र भाष्यम् अनुसृत्य 'अस्तिसिचोऽपृक्ते' इत्यत्र द्विसकारकं निर्देशं कृत्वा समाधानम् एव शुद्धम् इति प्रतिभाति। शब्दकौस्तुभरीत्या अतो रोरप्लुतादप्लुते इति सूत्रे रोः इति जातिनिर्देशः इति कल्पनं क्लिष्टकल्पनम् इति

---

[१] 'उक्तरीत्या रूपसिद्धावपि भाष्यानिर्वाहात्।' शब्दकौस्तुभे आहिभुवोरीट्प्रतिषेधः इति वार्तिकस्य व्याख्यानावसरे

प्रतिभाति। किन्तु तन्नये द्विसकारकनिर्देशे अपि सूत्रशरीरे परिवर्तनं न क्रियते इति विशेषः। नागेशनये तु सूत्रशरीरे परिवर्तनं कृतं चेदपि निर्देशशब्दस्य स्वारस्यं रक्षितमिति विशेषः इति उभयथा व्याख्याने युक्तिर्विद्यत इति सुधियः प्रमाणम्।

## परीशीलितग्रन्थसूची -

१. *काशिका*; वामनः जयादित्यः च; जयशङ्करलालत्रिपाठी तथा सुधाकरमालवीयः (सम्पादकः); दिल्ली– तारा बुक एजेन्सि; १९८५।

२. *प्रौढमनोरमा*; भट्टोजीदीक्षितः; गोपालशास्त्रीनेने(सम्पादकः); दिल्ली– मोतिलाल बनारसीदास; तृतीयसंस्करणम्; २००३ (पुनर्मुद्रणम्)।

३. *वैयाकरणसिद्धान्तकौमुदी*; भट्टोजीदीक्षितः; गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा(सम्पादकः); दिल्ली– मोतिलाल बनारसीदास; २००४ (पुनर्मुद्रणम्)।

४. *व्याकरणमहाभाष्यम्*; पतञ्जलिः; गुरुप्रसादशास्त्री(सम्पादकः); दिल्ली– राष्ट्रियसंस्कृतसंस्थानम्; २००६।

५. *लघुशब्देन्दुशेखरः चन्द्रकलाटीकया सहितः* ; नागेशभट्टः; भैरवमिश्रः (टीकाकारः) नरहरिशास्त्रिपेण्डसे(सम्पादकः); वाराणसी– चौखम्बासंस्कृतसंस्थानम्; २००१।

६. *शब्दकौस्तुभः* ; भट्टोजीदीक्षितः; विन्ध्येश्वरीप्रसादद्विवेदी तथा गणपतिशास्त्रिमोकटे (सम्पादकः); वाराणसी– चौखम्बासंस्कृतसिरिजअफिस; २००९।

7. *The Vyākaraṇa Mahābhāṣya of Patañjali*; Patañjali; F. Kielhorn & K. V. Abhyaṅkar (ed.); Pune– Bhandarkar Oriental Research Institute; 4th ed.; 1985

8. *Mahābhāṣya Pradīpa vyākhyānāni: commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa*; M. S. Narasimhacharya & Pierre-Sylvain Filliozat (eds.); Puducherry– Institut francais d’indologie; 1973

✶ ✶ ✶

# स्थानेऽन्तरतमः

**सुजितमाइतिः** *

## उपोद्घातः

पाणिनिविरचितायाम् अष्टाध्याय्यां प्रथमाध्याये प्रथमपादे पञ्चाशत्तमं सूत्रं हि 'स्थानेऽन्तरतमः' (पाणिनिसूत्रम् १.१.५०) इति सूत्रम्। सूत्रमिदं पदद्वयात्मकम् अस्ति। एकं हि स्थाने इति सप्तम्यन्तं पदम् अपरं हि अन्तरतम इति प्रथमान्तं पदम्। षड्विधेषु[१] सूत्रेषु सूत्रमिदं परिभाषासूत्रम्। अव्यवस्थायां व्यवस्थासम्पादकं भवति परिभाषासूत्रम्। अथवा अनियमे नियमकारिणी भवति परिभाषा। एकस्य स्थानिनः अनेकादेशप्रसङ्गे सति तत्र किं कर्तव्यम् इत्यस्मिन् विषये कोऽपि नियमो नासीत्। अर्थात् स्थान्यादेशविषये अव्यवस्था आसीत्। तादृश्याम् अव्यवस्थायां व्यवस्थां सम्पादयति सूत्रमिदम्। अतः अव्यवस्थायां व्यवस्थासम्पादकत्वाद् अस्य सूत्रस्य परिभाषात्वम् आयाति। तत्र पुनः साक्षात् शास्त्रतात्पर्यस्य ग्राहकत्वं परिभाषात्वम्[२] इति अभिमतं वैयाकरणेभ्यः अधिकं रोचते। स्थानिनः प्रसङ्गे सदृशतम आदेशो भवेदिति भवति शास्त्रतात्पर्यम्। तं शास्त्राभिप्रायं साक्षात् कथयति सूत्रमिदम्। तस्माद् अस्य सूत्रस्य परिभाषात्वम् इति मतान्तरम्। अस्मिन् प्रबन्धे परिभाषासूत्रमिदं यथामति यथाग्रन्थम् अल्पीयसा वचसा उपस्थाप्यते।

## सूत्रार्थविचारः

स्थितिः स्थानम्। **ल्युट् च** इति सूत्रेण 'ष्ठा गतिनिवृत्तौ' इति धातोः भावे ल्युट्-प्रत्यये स्वादिकार्ये स्थानम् इति शब्दो निष्पद्यते। अस्मिन् सूत्रे स्थानशब्दः प्रसङ्गवाची। प्रसङ्गो नाम प्राप्तिः। स्थानशब्दस्य नैके अर्थाः कोषे उल्लिखिता दृश्यन्ते। यथा– आधारः- शिवस्थानं कैलासः; अपकर्षः- गोस्थाने अश्वो वध्यताम्; निवृत्तिः- श्लेष्मणः स्थाने कटुकमौषधम्; प्रसङ्गः- दर्भाणां स्थाने शरैः प्रस्तरितव्यम्; निकटम्- मम गृहं स्थाने एव अस्ति इत्यादयः। तिष्ठन्ति यत्र तत् स्थानम् इति कृत्वा स्थाने इति पदस्य आधारार्थः स्वीक्रियते चेत् 'इको यणचि' इति सूत्रस्य प्रयोगस्थले अनिष्टापत्तिः भवति। तदा इकः आधारे यण् भवति इति सूत्रार्थः स्यात्। तथा सति इकः निवृत्तिः न स्यात्।

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

[१] संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

[२] लघुशब्देन्दुशेखरस्य राधिकाटीकायाम्

वस्तुतः इकः आधार आकाशम्। तत्र यणपि अस्ति। तेन सूत्रमेव व्यर्थं भवति। एवञ्च अपकर्षादयः अर्थास्तु नित्यरूपस्य शब्दस्य भवितुं नार्हन्ति। प्रसङ्गार्थ एव अत्र सङ्गच्छते। अतः प्रसङ्गवाची स्थानशब्दः स्वीक्रियते।

सर्वे इमे अन्तराः, अयम् एषाम् अतिशयेन अन्तरः इत्यर्थे अन्तरशब्दाद् 'अतिशायने तमबिष्ठनौ' (पाणिनिसूत्रम् ५.३.५५) इति सूत्रेण तमप्प्रत्यये अन्तरतमः इति शब्दो निष्पद्यते। अन्तरशब्दोऽस्मिन् सूत्रे सदृशपर्यायः। अतः अन्तरतमो नाम सदृशतमः। अन्तरतमः इति विशेषणपदम्। कस्य विशेषणम् इति जिज्ञासायामुच्यते आदेशस्य विशेषणम्।

सूत्रे क्रियमाणं तमब्ग्रहणं अनेकविधान्तर्यसत्तां बोधयति[३]। बहुविधान्तर्यसत्तायां तमब्ग्रहणं प्रमाणमिति सर्वसम्मतम्। तमब्ग्रहणेन अतिशयितोऽन्तर एव गृह्यते। तथा च वाग् हरि इति संहितायां ङकारो वा कुतो न स्यादिति जिज्ञासायां बालमनोरमायां वासुदेवदीक्षितेन उत्तरं दीयते– 'तमब्ग्रहणेन उक्तातिप्रसङ्गनिरासात्' इति। नागेशः पुनः तमब्ग्रहणं वाक्यभेदे मानमिति कथयति[४]।

प्रसङ्गे सदृशतमः स्यादिति सूत्रार्थः। तथा च दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यामुक्तम्– 'प्रसङ्गे सति सदृशतम आदेशः स्यादि'ति। कस्य प्रसङ्गे कः सदृशतमः इति जिज्ञासा भवति। उच्यते व्याकरणशास्त्रे यस्य प्रसङ्गे किमपि भवति स भवति स्थानी। स्थानिनः प्रसङ्गे यो भवति स भवति आदेशः। तस्मात् स्थानिनः प्रसङ्गे सदृशतम आदेशः स्यादिति सूत्रार्थः। तत्रापि एवं वक्तव्यं-- स्थानिनः बुद्धिप्रसङ्गे आदेशो भवति। इकः स्थाने यण् इति आदेशं कृत्वा यो विकार उत्पद्यते तत्तु केवलं बौद्धिकपरिवर्तनम्। न हि तत्र वस्तुतः स्थानिनः निवृत्तिः भवति, नहि तत्र आदेशो निवर्तको भवति।

पाणिनिना स्थानिनः आदेशस्य च साक्षात् कापि संज्ञा नोक्ता। मन्यते पाणिनिकाले स्थानी इति शब्दः यस्य प्रसङ्गे आदेशो भवति तद्विषये प्रसिद्ध आसीत्। तथैव आदेश इति शब्दोऽपि स्थानिनः प्रसङ्गे यो भवति तद्विषये एव प्रसिद्धः। तथाहि पुनः प्रसिद्धस्य शब्दस्य पारिभाषिकत्वेन स्वीकारो न कृतः। अर्थात् आदेशो यस्य प्रसङ्गे भवति स भवति स्थानी, स्थानिनोऽन्यथाभावो भवति आदेशः। तत्र पुनः एकदेशपरिवृत्त्या स्थानिनः अन्यथाभावो भवति आगमः। सर्वरूपपरिवृत्त्या योऽन्यथाभावः स आदेशः। वस्तुतः पाणिनीयतन्त्रे आदेशागमयोः व्यवस्थापनं व्याख्यानत एव विधीयते। साक्षाद् आदेशत्वम्

[३] तमब्ग्रहणमेवानेकविधान्तर्यसत्तागमकम् इति नागेशः परिभाषेन्दुशेखरे

[४] अत्रैव नागेशमतप्रतिपादनावसरे एतत् स्पष्टीभविष्यति

आगमत्वं वा अभिहितं न भवति।

वाक्यस्फोटस्यैव मुख्यत्वमिति स्वीकारे यद्यपि लडादयः स्थानिनः तिबादयश्च आदेशाः इत्येवं विभागं कर्तुं न पार्यते तथापि शास्त्रीयप्रक्रियानिर्वाहाय तेषां विभागः कल्पयितुं शक्यते। तत्र पुनः पाणिनिना 'लः कर्मणि भावे चाकर्मकेभ्यः' (पाणिनिसूत्रम् ३.४.६९) इत्यादिरूपेण यथा स्थानिनां कल्पिता अर्थाः प्रोक्ताः तथा कुत्रापि आदेशानाम् अर्था नोक्ताः। अतः स्थानिनाम् एव वाचकत्वम् आदेशानां नेति शङ्का समुदेति। तत्र स्थानेऽन्तरतमः इति सूत्रभाष्ये 'स्थान्यर्थाभिधानसमर्थस्यैवादेशते'ति भाष्योक्तिरेव आदेशानां वाचकत्वे प्रमाणम्। अर्थात् 'स्थानेऽन्तरतमः' इति परिभाषासूत्रानुरोधेन 'यदुच्चारणप्रसङ्गे यदुच्यते तत् तदर्थं बोधयती'ति सिद्धान्तानुसारं स्थानिनामिव आदेशानामपि वाचकत्वम् अस्तीति भावः। तत्रापि वैयाकरणा आदेशानामेव वाचकत्वं साधयन्ति [५]। नैयायिकास्तु लाघवानुरोधेन स्थानिनामेव वाचकत्वं प्रतिपादयन्ति। वस्तुतः कल्पितवाचकत्वस्योभयत्र सत्त्वेन अयं विवादः निष्फलः इति नागेशमतम्।

अन्तरस्य भाव इत्यर्थे अन्तरशब्दाद् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पाणिनिसूत्रम् ५.१.१२४) इति सूत्रेण ष्यञ्प्रत्यये स्वादिकार्ये आन्तर्यम् इति रूपं जायते। आन्तर्यं चतुर्विधं भवति– स्थानकृतम्, अर्थकृतम्, गुणकृतम्, प्रमाणकृतञ्चेति। अतः एकस्य स्थानिनः अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमः स एवादेशो भवतीति सम्पूर्णः सूत्रार्थः।

## १. स्थानकृतम्

अत्र स्थानं नाम ताल्वाद्युच्चारणस्थानम्। स्थानकृतान्तर्यस्य उदाहरणप्रसङ्गे उच्यते 'दण्ड अग्रम्' इत्यस्यां संहितायाम् 'अकः सवर्णे दीर्घः' (पाणिनिसूत्रम् ६.१.१०१) इति सूत्रेण दीर्घसन्धिः। 'अकः सवर्णे दीर्घः' इति सूत्रस्यार्थो हि अक उत्तरस्य सवर्णे अचि परतः पूर्वपरयोः स्थाने दीर्घः एकादेशो भवति संहितायां विषये। तस्माद् दण्ड अग्रम् इत्यत्र स्थानी अस्ति अकारद्वयम्, आदेशो भवति दीर्घवर्णः। परन्तु आकार-ईकार-ऊकारादयः दीर्घवर्णा अनेके सन्ति। एतेषु दीर्घवर्णेषु स्थानिनः अकारद्वयस्य प्रसङ्गे कतमस्य प्राप्तिः इति शङ्का। तत्र उच्यते स्थानिनः अकारद्वयस्य उच्चारणस्थानम् अस्ति कण्ठः।

---

[५] उच्चारित एवार्थप्रत्यायको भवति नानुच्चारितः इति भाष्योक्तिरेव आदेशानां वाचकत्वे मानम्

दीर्घवर्णेषु केवलम् आकारस्यैव उच्चारणस्थानं कण्ठः। अतः दण्ड अग्रम् इत्यस्यां संहितायां स्थानिनः अकारद्वयस्य प्रसङ्गे आकारस्य एव आदेशे सन्धिकार्ये दण्डाग्रम् इति रूपं भवति।

तत्र का नाम संहिता कश्च सन्धिः? पाणिनिना अष्टाध्याय्यां 'परः सन्निकर्षः संहिता' (पाणिनिसूत्रम् १.४.१०९) इति सूत्रेण संहितासंज्ञा विहिता। परन्तु पाणिनिना सन्धिशब्दस्य सकृदपि प्रयोगो न कृतः अष्टाध्याय्याम्। मन्यते पाणिनिकाले सन्धिशब्दो वर्णविकारे प्रसिद्ध आसीत्। तथाहि पुनः प्रसिद्धस्य शब्दस्य पारिभाषिकत्वेन स्वीकारो न कृतः। अर्थात् सन्धिर्नाम सन्निकर्षविशेषे विधीयमानः कार्यविशेषः।

## २. अर्थकृतम्

अर्थकृतान्तर्यस्य उदाहरणप्रसङ्गे एकं सूत्रं वितन्यते- 'तृज्वत्क्रोष्टुः' (पाणिनिसूत्रम् ७.१.९५) इति। सूत्रमिदम् अतिदेशसूत्रम्। सूत्रस्यार्थो हि क्रोष्टुशब्दः तृजन्तवद्रूपं लभतेऽसम्बुद्धौ सर्वनामस्थाने परे। क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्यः इत्यर्थः। अतः अत्र स्थानी अस्ति उकारान्तः क्रोष्टुशब्दः, आदेशो भवति तृजन्तशब्दः। तृजन्तः नाम तृच्-प्रत्ययान्तः शब्दः। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् इति परिभाषानुसारेण अत्र तदन्तविधिः। परन्तु तृजन्तशब्दाः अनेके सन्ति यथा कर्तृ-होतृ-पक्त्रादयः। तेषु कतमस्य अत्र प्राप्तिः इति जिज्ञासा। तत्र अर्थत आन्तर्येण क्रोष्टुशब्दस्य स्थाने तृजन्तक्रोष्टृशब्दः एव आदेशः, न तु होत्रादयः।

## ३. गुणकृतम्

गुणशब्देन बाह्यप्रयत्ना एव गृह्यन्ते। गुणकृतान्तर्यस्य उदाहरणं हि 'वाग् हरिः' इति संहिता। वाग् हरिः इति संहितायां 'झयो होऽन्यतरस्याम्' (पाणिनिसूत्रम् ८.४.६२) इति सूत्रस्य प्रवृत्तिः। सूत्रस्य अर्थो हि झय उत्तरस्य हकारस्य पूर्वसवर्णादेशो भवति विकल्पेन। वाग् हरिः इति संहितायाम् अनेन सूत्रेण हकारस्य पूर्वसवर्णविधौ गकारो भवति निमित्तम्। गकारस्य सवर्णाः भवन्ति कवर्गस्थाः कखगघङाः पञ्च वर्णाः। अस्यां स्थितौ स्थानी भवति हकारः, आदेशाः भवन्ति कखगघङाः वर्णाः। अतः हकारस्य स्थाने कखगघङवर्णेषु कतमस्य आदेशो भवति इति शङ्कायाम् उच्यते गुणकृतान्तर्येन अत्र कवर्गचतुर्थस्य घकारस्यैव आदेशो भवति हकारस्य स्थाने। स्थानीभूतो हकारो भवति घोषनादसंवारमहाप्राणाख्यप्रयत्नवान्, कखगघङवर्णेषु प्रथमतृतीयपञ्चमा न भवन्ति अल्पप्राणत्वात्, द्वितीयः

खकारोऽपि न श्वासाघोषविवारप्रयत्नकत्वात्। केवलं चतुर्थो घकारो भवति घोषनादसंवारमहाप्राणप्रयत्नवान्। तस्मात् हकारस्य स्थाने गुणान्तर्यानुसारेण घकारो भवति। ततश्च वाग्घरिरिति भवति। पूर्वसवर्णाभावे तु वाग् हरिरिति रूपमपि साधु।

**४. प्रमाणकृतम्**

प्रमाणशब्देन एकद्विमात्रादिपरिमाणं गृह्यते। अत्र दृष्टान्तत्वेन 'अदसोऽसेर्दादुदोमः' (पाणिनिसूत्रम् ८.२.८०) इति सूत्रम् उपस्थाप्यते। सूत्रस्यास्य अर्थो हि असेः अदसः दात् परस्य उदूतौ स्तः दकारस्य च मकारो भवतीति। अविद्यमानः सकारः यस्य स भवति असिः। अत्र इकारः उच्चारणार्थः प्रयुक्तः। तस्य षष्ठ्यामेकवचने असेः इति रूपम्। उश्च ऊश्च, तयोः समाहारः इति समाहरद्वन्द्वे प्रक्रियाकार्ये उ इति रूपं भवति। अतः सूत्रस्थ-उपदेन एकमात्रिकस्य द्विमात्रिकस्य च उकारस्य बोधः। तथा सति अदस् अम् इति दशायां 'त्यदादीनामः' (पाणिनिसूत्रम् ७.२.१०२) इति सूत्रेण अत्त्वे अद अ अम् इत्यवस्थायां पररूपे अद अम् इति स्थिते 'अमि पूर्वः' (पाणिनिसूत्रम् ६.१.१०७) इत्यनेन पूर्वरूपे अदम् इति भवति। तदा 'अदसोऽसेर्दादुदोमः' इति सूत्रस्य प्रवृत्तिः। अदम् इत्यत्र दात् परस्य एकमात्रिकस्य उत द्विमात्रिकस्य उकारस्य आदेश इति शङ्का। तत्रोच्यते प्रमाणकृतान्तर्यानुसारेण एकमात्रिकस्य स्थाने एकमात्रिकोकारः द्विमात्रिकस्य स्थाने द्विमात्रिकोकार आदेशो भवति। अतः अदम् इत्यत्र दात् परस्य एकमात्रिकस्य अकारस्य स्थाने एकमात्रिकोकारे दस्य च मत्वे अमुम् इति रूपसिद्धिः।

**सूत्रपाठगतभेदः**

अष्टाध्याय्यां सूत्राणि गुरुपरम्परायां संहितानुसारम् उच्चार्य्यन्ते। अष्टाध्याय्याः संहितापाठः एव प्रकृतपाठः। अष्टाध्याय्यां संहितापाठ एवम् उपलभ्यते– 'स्थानेऽन्तरतम उरण् रपर...' इति। तेन सूत्रस्य आकृतिः द्विधा कल्पयितुं शक्यते। एकः अन्तरतमपदस्य प्रथमान्तपाठपक्षः स्थानेऽन्तरतमः इति। अपरः सप्तम्यन्तपाठपक्षः स्थानेऽन्तरतमे इति। प्रथमान्तपाठपक्षे 'भोभगोअघोअपूर्वस्य योऽशि' (पाणिनिसूत्रम् ८.३.१७) इति सूत्रेण स्वादिसन्धिः। सप्तम्यन्तपाठपक्षे 'एचोऽयवायावः' (पाणिनिसूत्रम् ६.१.७८) इति सूत्रेण अय्-आदेशे 'लोपः शाकल्यस्य' (पाणिनिसूत्रम् ८.३.१९) इत्यनेन यकारलोपे कृते समानं रूपमेव जायते। अतः उभयत्रैव

सन्धिकार्ये स्थानेऽन्तरतम उरण् रपर इत्येवं लभ्यते। तत्र प्रथमान्तपाठः उत सप्तम्यन्तपाठः वा युक्त इति सन्देहः।

**प्रथमान्तपाठपक्षः**

प्रथमान्तपाठपक्षे सूत्रस्यार्थो भवति स्थानिनः प्रसङ्गे सदृशतम आदेशो भवतीति। प्रथमान्तपक्षे आदौ स्थानी द्रष्टव्यः। स्थानिनः सादृश्यानुसारेण आदेशः निरूपणीयः।

**सप्तम्यन्तपाठपक्षः**

आदेशो भवति सदृशतमस्य स्थानिनः प्रसङ्गे इति सप्तम्यन्तपाठपक्षे सूत्रार्थः। अस्मिन् पक्षे आदौ आदेशः द्रष्टव्यः। आदेशस्य सादृश्यानुसारेण स्थानिनः निर्देशः कर्तव्यः।

अत्र कतरः पक्षः ग्रहणीय इति संशय उदेति। एतयोः प्रथमान्तपाठपक्ष एव सिद्धान्तत्वेन शास्त्रे व्यवस्थितः। यतो हि प्रथमान्तपक्षे सूत्रार्थे नास्ति कश्चन दोषः। सप्तम्यन्तपाठपक्षः स्वीक्रियते चेत् दोषाय भवति इति कृत्वा सप्तम्यन्तपक्षः त्यक्तः। आदेशः अन्तरतमे स्थानिनि भवतीति सप्तम्यन्तपक्षः स्वीक्रयते चेत् 'इको यणचि' इत्यनेन कुमार्यत्र इत्यादीनां रूपाणाम् असिद्धिप्रसङ्ग आयाति। यतो हि आदेशभूतो यण् भवति अर्धमात्रा, किन्तु स्थानी इक् एकमात्रा। तेन प्रमाणकृतान्तर्यानुसारेण यद्यपि दध्यत्र इत्यादौ यत् किञ्चित् सादृश्यानुसारं यण् स्यात्, न तु कुमार्यत्र इत्यादौ। तत्र ईकारस्य द्विमात्रत्वेन विप्रकृष्टत्वात् यणादेशः न स्यात्। नास्ति अत्र प्रथमान्तपाठे दोषः। किन्तु 'वान्तो यि प्रत्यये' (पाणिनिसूत्रम् ६.१.७९) इत्यत्र प्रथमान्तपक्षेऽपि दोष आपादितः पूर्वपक्षिणा। किन्तु स दोषः वारितः। एवं प्रथमान्तपक्षे प्रतिपादितानां दोषाणां परिहारेण प्रथमान्तपक्षो निर्दुष्ट इति भाष्याभिप्रायः।

**यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषाविचारः**

चिञ् चयने इति धातोः तृच्-प्रत्यये चिञ्+तृच् इत्यवस्थायाम् अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' (पाणिनिसूत्रम् ७.३.८४) इत्यनेन सूत्रेण इकारस्य स्थाने जायमानो गुणः स्थानत आन्तर्येण एकारः उत प्रमाणत आन्तर्येण अकारो वेति पक्षे अस्याः परिभाषाया अवतरणं परिभाषेन्दुशेखरे परिलक्ष्यते[६]।

एकस्य स्थानिनः अनेकविधान्तर्यैः अनेकादेशप्रसङ्गे स्थानत

[६] ननु चेतेत्यादौ ह्रस्वस्येकारस्य प्रमाणत आन्तर्य्यादकारोऽपि स्यादत आह...इति परिभाषेन्दुशेखरे नागेशः।

आन्तर्यवानेवादेशो भवति नान्यविधान्तर्यवान् इति परिभाषार्थः। अत्र परिभाषात्वं नाम साक्षाच्छास्त्रतात्पर्यग्राहकत्वे सति मुन्यभिप्रेतत्वे सति पाणिन्युच्चारितभिन्नत्वम्। इयं परिभाषा ज्ञापकसिद्धा। ज्ञापकञ्च प्रकृतशास्त्रप्रसिद्धप्रमाणम्। अतः पाणिनिना यत्रानेकविधमिति परिभाषा साक्षान्नोच्चारिता किन्तु शास्त्रेण तत् ज्ञाप्यते। एवञ्च ज्ञापने मुनित्रयस्य अभिप्रायो वर्तते इत्यपि बोद्धव्यम्।

'स्थानेऽन्तरतमः' इत्यस्मिन् सूत्रे 'षष्ठी स्थानेयोगा' (पाणिनिसूत्रम् १.१.४९) इति पूर्वसूत्रात् एकदेशे स्वरितत्वप्रतिज्ञाबलात् स्थानशब्दे अनुवर्तमानेऽपि 'स्थानेऽन्तरतमः' इति सूत्रे पुनः स्थानेग्रहणं 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषाया ज्ञापकम्।

**दीक्षितमतम्**

वासुदेवदीक्षितेन बालमनोरमायाम् अस्याः परिभाषायाः विचारकाले यदुक्तं तद् भट्टोजिदीक्षिताभिप्रेतमिति ऊहितुं शक्यते। तस्य मते 'षष्ठी स्थानेयोगा' इत्यस्मात् सूत्रात् स्थाने इति पदम् इह सूत्रे अनुवर्तते, स्थाने इति एकदेशे स्वरितत्वप्रतिज्ञाबलात्। 'स्वरितेनाधिकारः' इत्यनेन स्वरितत्वयुक्तस्य स्थानपदस्य अधिकारत्वप्राप्तिः। अधिकार इत्युक्ते विनियोगः। तेन स्थाने इति इह तृतीयान्तत्वेन विनियुज्यते। अतः स्थाने इति अत्र विभक्तिविपरिणामेन स्थानेन इति भवति। 'षष्ठी स्थानेयोगा' इत्यत्र स्थाने इति शब्दः प्रसङ्गवाची अस्ति। किन्तु अनुवर्तनात् परम् इह सूत्रे स्थाने इति शब्दः ताल्वाद्यन्यतमस्थानपरो भवति। तथाहि बालमोनरामायां निगदितम्– 'अनुवर्त्यमानश्चायं स्थानशब्दः पूर्वसूत्रे प्रसङ्गपरोऽप्यत्र ताल्वाद्यन्यतमस्थानपरः, शब्दाधिकाराश्रयणात्' इति। अर्थात् शब्दप्राधान्ये व्याकरणशास्त्रे शब्दस्य अधिकारः भवति, किन्तु अर्थसहितशब्दस्य न। अतः कस्मिंश्चित् सूत्रे किमपि पदं यस्मिन्नर्थे प्रयुक्तं भवति अनुवर्तनात् परं तस्मिन्नेव अर्थे तस्य प्रवृत्तिप्रसङ्गे नास्ति कश्चन नियमः। अनेन व्याकरणे शब्दस्य प्राधान्यम् अनुभूयते, न तु अर्थस्य। तथाहि अनुवर्तमानः स्थानशब्दः इह सूत्रे ताल्वाद्यन्यतमस्थानपर इति तस्य मतम्। एवञ्च अन्तरतम इत्यनेन सह सम्बध्यते। तेन स्थानेनान्तरतम इति वाक्यान्तरं भवति। ततश्च ताल्वादिस्थानतोऽन्तरतम आदेशो भवतीत्यर्थ आयाति।

बालमनोरमाकारस्य मते 'स्थानेऽन्तरतमः' इति सूत्रे वाक्यद्वयं विद्यते। एकं स्थानेऽन्तरतमः इति अपरं हि. स्थानेनान्तरतमः इति। प्रसङ्गे सति सदृशतम आदेशः स्यादिति प्रथमवाक्यार्थः। सति सम्भवे ताल्वादिस्थानत एवान्तरतमो

भवतीति द्वितीयवाक्यार्थः। अतः तस्य मते द्वितीयवाक्येन इयं परिभाषा ज्ञाप्यते। तत्र पुनः अनुवर्तमानं स्थाने इति पदं परिभाषाया अस्या ज्ञापकं भवतीति वक्तुं शक्यते।

## नागेशमतम्

नागेशेन 'स्थानेऽन्तरतम' इति सूत्रे वाक्यभेदः क्रियते। अनुवर्तमानेन प्रसङ्गवाचिना स्थानशब्देन एकं वाक्यं, सूत्रस्थेन तात्वादिस्थानवाचिना स्थानशब्देन अपरं वाक्यम्। एवं 'स्थानेऽन्तरतम' इति सूत्रे अन्तरतम इति पदं प्रथमं ततः स्थाने इति पदं पठनीयम्। ततश्च अन्तरतमः इत्यत्र 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थाने इति पदमनुवर्तते। तेन अनुवर्तमानस्थाने इति सहितः अन्तरतम इति प्रथमवाक्यम्। अत्र स्थाने इत्यस्य प्रसङ्ग इति अर्थः। तेन प्रथमवाक्यस्यार्थो भवति प्रसङ्गे सति सदृशतम आदेशो भवतीति। स्थाने इति द्वितीयवाक्यम्। अस्य ताल्वादिस्थानम् अर्थः। स्थाने इति तृतीयान्ततया विपरिणम्यते। अन्तरतम इति च इहानुवर्तते। एवञ्च प्रसङ्गे सति स्थानेन सदृशतम आदेशो भवतीति द्वितीयवाक्यस्यार्थः। अतः स्थानेऽन्तरतम इत्याकारकं वाक्यद्वयम् अस्तीति भावः।

नागेशमते 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थाने इति अनुवर्तमानेऽपि पुनः 'स्थानेऽन्तरतमः' इति सूत्रे स्थानेग्रहणं यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति परिभाषाया मानम्। अतः 'स्थानेऽन्तरतमः' इति सूत्रस्थं स्थानेपदं तृतीयया विपरिणम्य वाक्यभेदमाश्रित्य परिभाषामिमां ज्ञापयति। वाक्यभेदस्य तमब्ग्रहणमेव लिङ्गम्। तथाहि उक्तम्– 'स्थानेग्रहणे एकदेशानुवृत्त्याऽनुवर्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वाक्यभेदमाश्रित्य प्रसङ्गे सति सम्भवे स्थानत एवान्तरतम इत्यर्थकमिति भावः'[७] इति।

## बालबोधिनीटीकाकर्तुः मतम्

परिभाषेन्दुशेखरस्य बालबोधिनीटीकायाः रचयिता भवति श्रीपादसत्यनारायणमूर्तिः। तेन अस्याः परिभाषायाः बालबोधिनीटीकायां किञ्चिद् भिन्नं मतं प्रतिपादितम्। तस्य मते 'स्थानेऽन्तरतमः' इति योगद्वयं सूत्रम्। तत्र अन्तरतम इति प्रथमयोगः, स्थाने इति द्वितीययोगः। अन्तरतमः इति प्रथमयोगे 'षष्ठी स्थानेयोगा' इति सूत्रात् प्रसङ्गवाची स्थाने इति पदमनुवर्तते। तेन प्रथमयोगस्यार्थो भवति प्रसङ्गे सति

[७] अस्य सूत्रस्य लघुशब्देन्दुशेखरे

सदृशतम आदेशो भवतीति। स्थाने इति द्वितीययोगः। स्थाने इति पदं तृतीयान्ततया विपरिणम्य स्थानेन इति भवति। प्रसङ्गार्थकस्थाने इति पदम् अन्तरतम इति च अस्मिन् योगे अनुवर्तते। एवञ्च प्रसङ्गे सति स्थानेन सदृशतम आदेशो भवतीति द्वितीययोगस्यार्थः। अतः बालबोधिनीकारस्य मते 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थाने इति अनुवर्तमाने पुनः 'स्थानेऽन्तरतमः' इति सूत्रे ताल्वादिस्थानवाचकं स्थाने इति पदं यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति परिभाषायां मानम्। अस्याः परिभाषायाः प्रवृत्तिस्थलप्रसङ्गे तेनोक्तम्– 'यत्र स्थानतदन्यकृतमान्तर्यं मिथो विरुद्धादेशसम्पादकम्, यथा चेतेत्यादौ तत्रैवायं नियमः प्रवर्तते' इति। किन्तु श्रीपादसत्यनारायणमूर्तिमहोदयेन योगशब्दः वाक्यतात्पर्येण उक्तो न वेति विचारपरम्।

## भाष्यमतम्

पतञ्जलिना महाभाष्ये सूत्रमिदं प्रत्याख्यातम्। तत्र भाष्ये– 'अन्तरतमवचनं चाशिष्यम्, योगश्चायमशिष्यः- स्वभावसिद्धत्वादेव' इति उक्तम्। अत्र न केवलम् अन्तरतमः इत्यस्य अशिष्यत्वम्, अपि तु सम्पूर्णसूत्रस्यैव अशिष्यत्वम् उच्यते। तथाहि प्रोक्तं 'योगश्चायमशिष्यः' इति। अशिष्ये स्वभावसिद्धत्वम् एव हेतुः। दृष्टान्तत्वेन उक्तम् 'तद्यथा समाजेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषाम् एव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते' इति। न केवलं मनुष्याणाम् किन्तु पशूनामपि तादृशी व्यवस्था परिलक्ष्यते। यथा गावः आदिवसम् इतस्ततः भक्षणार्थम् अटित्वा दिवसान्ते स्वस्वप्रसवेनैव सह शेरते। अचेतनेष्वपि तथा दृश्यते[८]। एवं स्थानिन आन्तर्यम् अपि लोकत एव सिध्यति। लोकत एव सूत्रार्थस्य बोधात् तदर्थं सूत्रं नारम्भणीयमिति कृत्वा सूत्रमिदं प्रत्याख्यातं भाष्ये। तथा यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति परिभाषार्थोऽपि लोकस्वभावादेव लभ्यते इति भाष्याशयः[९]।

## उपसंहृतिः

पाणिनिना स्थान्यादेशव्यवस्थाविधायकम् अष्टाध्याय्याम् एकं परिभाषासूत्रम् उपनिबद्धम्। तच्च 'स्थानेऽन्तरतमः' इति सूत्रम्। अस्मिन्

---

८ लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः...इति स्थानेऽन्तरतम इति सूत्रभाष्ये।

९ अनेनापि ग्रन्थेन यत्रानेकविधमित्यर्थः साधित इत्याहुः इति भाष्यप्रदीपोद्योते नागेशः

प्रबन्धे अस्य सूत्रस्य प्रतिपादनं यथामति विहितम्। चतुर्विधस्य आन्तर्यस्य सोदाहरणं व्याख्यानमपि प्रतिपादितम्। सूत्रपाठगतभेदोऽपि समासेन उल्लिखितः। तत्र प्रथमान्तपाठपक्ष एव सिद्धान्तत्वेन उपस्थापितः। एवञ्च स्थानेऽन्तरतमसूत्रस्थस्थानेग्रहणमूलिका 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषापि प्रतिपादिता। अस्याः परिभाषायाः समालोचनावसरे अत्र बालमनोरमाकारस्य नागेशस्य बालबोधिनीकारस्य भाष्यकारस्य च मतान्यपि विस्तारेण विचारितानि। किन्तु अत्र कस्यापि मतं प्राधान्येन न प्रदर्शितम्। एतेषु कतमं मतं निर्दुष्टं ग्रहणयोग्यञ्च तद् विचारपरम्। इत्थं यथाबुद्धि यथाशक्ति च सूत्रस्यास्य समीक्षा विहिता। प्रबन्धोऽयं जिज्ञासूनाम् उपकाराय भवति चेत् सफलोऽयं प्रयासः स्यादिति शम्।

## परिशीलितग्रन्थसूची

१. *परिभाषेन्दुशेखरः (चन्द्रिका-बालबोधिनीव्याख्याद्वयोपेतः)*; नागेशभट्टः; श्रीपादसत्यनारायणः मूर्तिः (सम्पादकः); तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्; २००४।

२. *परिभाषेन्दुशेखरः (सुबोधिनीहिन्दीव्याख्योपेतः)*; नागेशभट्टः; विश्वनाथः मिश्रः (सम्पादकः); वाराणसी : चौखम्बा सुरभारती प्रकाशन; २०१४।

३. *लघुशब्देन्दुशेखरः (पञ्चसन्ध्यन्तः सुबोधिनीहिन्दीव्याख्योपतः)*; नागेशभट्टः; विश्वनाथः मिश्रः (सम्पादकः); दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान; २०१२।

४. *लघुशब्देन्दुशेखरः (राधिकासंस्कृतहिन्दीव्याख्याद्वयोपेतः पञ्चसन्ध्यन्तो भागः)*; नागेशभट्टः; श्रीब्रह्मदत्तः द्विवेदी (सम्पादकः); वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस; २००८।

५. *परमलघुमञ्जूषा (भावप्रकाशिका-बालबोधिनी-संस्कृत-हिन्दीव्याख्योपेता)*; नागेशः; जयशङ्करलालः त्रिपाठी (सम्पादकः); वाराणसी : चौखम्बा कृष्णदास अकादमी; २०११।

६. *पाणिनीयव्याकरणमहाभाष्यम् (प्रथमः खण्डः)*; पतञ्जलिः; श्रीभार्गवः शास्त्री (सम्पादकः); दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान; १९८७।

७. *अष्टाध्यायी (पदच्छेद-वृत्ति-वार्तिक-टिप्पनी-सहिता)*; पाणिनिः; गोपालदत्तः पाण्डेयः (सम्पादकः); वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्; २००९।

८. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीविभूषिता)* (प्रथमो भागः); भट्टोजिदीक्षितः; शिवप्रसादः शर्मा (सम्पादकः); वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्; २००८।

९. *महाभाष्यार्थदीपिका (नवाह्निकान्तः प्रथमो भागः)* (प्रथमो भागः); कृष्णकुमारः (सम्पादकः); केरल : चिन्मय इन्दर्नेशनल फाऊण्डेशन शोध संस्थान; २०१५।

# वाक्यविज्ञानम्

**कृष्णगोपालपात्रः ***

## १. उपोद्घातः

'वाचामेव प्रसादेन लोकयात्रा प्रवर्तते' इति अभियुक्तवचनान्निश्चप्रचं भाषा एव लोकचालिका। भाषा एव मानवजीवनस्य सारभूतः रस इति उपनिषदि अपि आम्नातम् –'पुरुषस्य वाग् रसः, वाच ऋग् रसः' इति। ध्वनिमेलनेन शब्दः पदं वा जायते। पदानां च मेलनेन वाक्यं सञ्जायते। वाक्यविज्ञाने वाक्यस्य भाषावैज्ञानिकदृशा विवेचनं विधीयते। वाक्यस्य संरचनं तु सार्थकपदैरेव। वाक्यं भाषायाः अत्यन्तं महत्त्वपूर्णो विषयः। केषांचन मते वाक्यस्य एव प्रमुखता केषाञ्चन च मते पदस्य। आधुनिका अपि विद्वांसः एवं मन्यन्ते यत् भाषायां वाक्यमेव मुख्यम्, तद्वारैव सूक्ष्मातिसूक्ष्मं विवचनं विधीयते। वाक्यम् इति श्रवणेन मनसि प्रश्नः स्यात् यत् पदसमूहः एव वाक्यम् उत येन अर्थप्रतीतिः भवति तत् वाक्यमिति। सन्दर्भेऽस्मिन् राराजते विद्वद्विप्रतिपत्तिः। वाक्यशब्दस्य प्रयोगः भारतीयशास्त्रीयपरम्परायां हि सर्वत्र लक्ष्यते। वाक्यस्वरूपं विवेचयन्तः पाश्चात्त्या विद्वांसः क्वचित् भारतीयपरम्परया क्वचिच्च पृथक्तयैव निर्दिशन्ति। संस्कृतस्य भाषाशास्त्रीयं महत्त्वमपि विद्वद्भिः स्वीकृतम्। भाषाविज्ञाने ध्वनिविज्ञानम् अर्थविज्ञानं वाक्यविज्ञानं शब्दविज्ञानमिति चत्वारो भेदाः भवन्ति। भाषाविज्ञानस्य आधारः एव संस्कृतभाषा इति विन्टरनित्समहाभागाः अभिप्रयन्ति– "In the earliest ages the Indians already analysed their ancient sacred writings with a view to philology, classified the linguistic Phenomena as a Scientific system and developed their grammar so highly that even today modern Philology, can use their grammar attainments as a foundation." [२]

## २. वाक्यस्वरूपम्

भाषाविज्ञानस्य महत्त्वपूर्णो विषयो भवति वाक्यविज्ञानम्। यच्च आङ्गलभाषया सिन्टेक्स् इत्युच्यते। अद्यत्वे वाक्यविषयकं बहुविधं पाश्चात्यमतं प्राच्यमतं च जगति आलोच्यमानं विद्यते। वाक्यं हि भारतीयानां

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

२ Winternitz, History Of .Indian Literature. P.-8.

वैय्याकरणानां प्रमुखो विषयः। भाषायाः विचारस्य न्यूनतमं घटकं भवति वाक्यम् इति पाणिनीयपरम्परा, आधुनिकभाषाविदोऽपि तदनुसारिणः। अष्टौ स्फोटाः वैयाकरणनिकाये प्रसिद्धाः, तेषु च वाक्यस्फोटस्य मुख्यता प्रायः सर्वैः स्वीक्रियते। भाषायाः मौलिकं घटकं हि वाक्यमेव इति विचिन्त्य वाक्यस्फोटस्य मुख्यतोररीकृता। शब्दनित्यत्ववादस्तु वैयाकरणैः मीमांसकैरपि स्वीक्रियते। परं पदविषयकाः युक्तीः सप्रमाणं परिहृत्य तत्तच्छास्त्रे वाक्यपक्षोऽपि प्रतिष्ठितः। अर्थात् वाक्यपक्षे वाक्यमेव ध्रुवं कूटस्थं परिणामरहितम् अक्षयम् अवयवरहितं च इति तेषां धीः। पदस्यास्तित्वं तज्ज्ञानं च वाक्यद्वारेणैव अन्वयव्यतिरेकाभ्याम् इति 'अपोद्धारपदार्था ये' इत्यादिकल्पनया तेषां व्यवहारः वाक्यपदीये प्रदर्शितः। विश्वस्य प्राचीनतमो ग्रन्थो हि ऋग्वेदः। वेदे सूक्तानि विद्यन्ते। सूक्तेषु च पुनः ऋचः विराजन्ते। छन्दोबद्धे ऋग्वेदे वाक्यं नास्तीति सामान्यतः प्रतीयते परं सूक्तलक्षणं प्रतिपादयन् शौनकः ब्रूते बृहद्देवतायां –'सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते' इति। तन्नाम ऋषेः वाक्यं सूक्तमिति तस्याभिप्रायः। बृहद्देवतायां वाक्यलक्षणं निगदितं तेन–

अर्थात्पदं स्वाभिधेयं पदाद्वाक्यार्थनिर्णयः।
पदसंघातजं वाक्यं वर्णसंघातजं पदम्॥

[बृहद्देवता– २.११७]

पदसमूहो वाक्यम्। क्वचित् च नामाख्यातोपसर्गनिपातानां संघः वाक्यम्। उव्वटाचार्यः यजुर्वेदभाष्यस्योपक्रमे वाक्यं निरूपयन्नाह–'नामाख्यातोपसर्गनिपातसमुदायो वाक्यम्, तस्यार्थः वाक्यार्थः' इति।

## २.१. वैयाकरणमतम्

वाक्यस्वरूपविषये वैयाकरणाः मीमांसकाः नैयायिकाः आलंकारिकाः शाक्ताः इतरशास्त्रानुसारिणः अपि विविधं मतं प्रकटितवन्तः। पाश्चात्या अपि श्लाईखर–गार्डिनर–चामस्की–ब्लूमफील्ड–सौस्यूरप्रभृतयः विद्वांसः स्वमतं प्रकटयामासुः। क्वचित् एषां मतैक्यं क्वचिच्च वैमत्यं दृश्यते व्याख्यानपद्धतौ। वाक्यविषयकविचारे भर्तृहरेः अत्यन्तं सूक्ष्मातिसूक्ष्मं विवेचनं दृश्यते। अद्यत्वे भाषाविषयकं समीक्षणं सर्वमपि प्रायः भर्तृहरिप्रोक्तसिद्धान्तैः सह सन्तोल्य विवेच्यते। किञ्च तदीयः भाषावैज्ञानिकः सिद्धान्तः पाश्चात्यपण्डितानाम् अपि अत्यन्तम् अभीष्टः। अर्थात् तस्यैव मतमिदानीं प्रमाणभूतं जातं जगति। पदं

वाक्यादेव विनिर्गतमिति भगवान् भर्तृहरिः। प्राचीनानामाचार्याणां मतानि समाश्रित्य वाक्यविषयेऽष्टौ पक्षाः तेन निर्दिष्टाः। तथाहि–

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्॥

[वाक्यपदीयम्– २.१–२]

तदेवं हरिकारिकामाश्रित्य अष्टौ पक्षाः क्रमादधः निर्दिश्यन्ते–

### २.१.१ आख्यातशब्दो वाक्यम्

आख्यातशब्दः एव वाक्यमिति प्रथमः पक्षः। आख्यातेन च क्रियापदं बुध्यते। क्रियाहीनं हि वाक्यं क्वचिदपि न श्रूयते तस्मात् क्रियाप्रधानपदं वाक्यमिति फलितम्। तस्य च क्रियापदस्य क्वचित् साक्षात् क्वचिच्च अनुमानेन बोधः। हरिवृत्तौ एतदेव श्रूयते "तस्माच्छ्रूयमाणं क्रियापदं अनुमीयमानं क्रियापदं वा वाक्यमेव सर्वव्यवहारेषूपपद्यते" इति। वर्षति इत्युच्यमाने स्वयमेव इन्द्रः इत्यादिकर्तृकर्मादीनां बोधः अध्याहारात् ज्ञेयः। तथाहि हरिवाक्यं–

आख्यातशब्दे नियतं साधनं यत्र गम्यते।
तदप्येकं समासार्थं वाक्यमित्यभिधीयते॥

[वाक्यपदीयम्– २.३२६]

### २.१.२ सङ्घातः वाक्यम्

सङ्घातो वाक्यमिति द्वितीयः पक्षः। एकार्थनिरूपकः पदसङ्घातः इत्यर्थः। पदसङ्घातपक्षे तु पदं प्रथमं सामान्यार्थं बोधयति तदनु समुदाये अन्विते सति विशेषार्थं गमयति। अस्मिन् च पक्षे पिधेहि इति आख्यातमात्रं न वाक्यं यतो हि अत्र द्वारम् इति क्रियापदस्य अध्याहारो भवति परमत्र सङ्घातो न विद्यते अतः अस्य वाक्यत्वं नास्ति। पिधेहि द्वारम् इति पदद्वयं सम्भूय वाक्यत्वं जनयति। शृङ्गारप्रकाशे एतदेव दृष्टान्तेन प्रदर्शितम्–"यथा तत्र यथा त्रयोऽपि ग्रावाणः उखां धारयन्ति, चत्वारोऽप्युदन्तारः शिविकाम् उद्यच्छन्ति, सर्वाण्यपि कारकाणि पाकं साधयन्ति तथा पदान्यपि सर्वाणि वाक्यार्थमन्ववगमयन्तीति"। इदं मतं वस्तुतः व्याडेः मतमादायैव निरूपितम्।

### २.१.३ सङ्घातवर्तिनी जातिः वाक्यम्।

सुबन्तानां तिङन्तानां सङ्घाते विद्यमाना जातिः वाक्यमिति तृतीयः पक्षः। देवदत्तो गामभ्याज दण्डेनेति वाक्ये पदसङ्घातरूपे तादृशः कश्चित् जातिविशेषो विद्यते येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं च भिद्यमानेऽपि एकत्वप्रत्यभिज्ञा भवति। परन्तु आनन्त्यव्यभिचारदोषप्रसङ्गात् पदसङ्घाते वाचकत्वं स्वीकर्तुं न शक्यम्। अतः पदसङ्घातगतायाः जातेरेव वाचकत्वं तदीयजातेरेव वाक्यत्वं वक्तुमुचितम्।

### २.१.४ एकोऽनवयवः शब्दः वाक्यम्

तुरीयपक्षोऽयम्। अस्मिन् मते वाक्यं निरवयवम् एकं पूर्णमविच्छिन्नं च भवति। अवयवादिविवेचनं तु परं क्रियते। चित्रदृष्टान्तेन इदं भर्तृहरिणा सुष्ठु निरूपितम्–

चित्रस्यैकरूपस्य यथा भेदनिदर्शनैः।
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः॥
तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः।
शब्दान्तरैः समाख्यानं साकाङ्क्षैरवगम्यते॥

[वाक्यपदीयम्– २.८–९]

यदा किञ्चित् चित्रं वयं पश्यामश्चेत् प्रथमं सम्पूर्णं चित्रमेव अस्माकं दृग्गोचरं भवति तदनन्तरं च अवयवशः। एवमेव वाक्यविज्ञाने अपि प्रथमं सम्पूर्णं वाक्यमस्माकं दृक्पथमायाति तदनु च अवयवशः।

### २.१.५ क्रमो वाक्यम्

पञ्चमः पक्षश्च क्रम एव वाक्यमिति। पदानां विशिष्टक्रमो वाक्यम्। क्रमस्तु कालधर्मः। कालस्य शक्तिविशेषः क्रमः। ध्वनिसङ्घात् पदसङ्घात् योऽर्थः प्रतीयते स क्रमविशिष्टात् एव। अर्थबोधाय पदानां क्रमोऽपेक्षितः। हरिणा वाक्यपदीये सप्तकारिकाभिः क्रमः निरूपितः।

### २.१.६ बुद्ध्यनुसंहृतिः वाक्यम्

अत्र बुद्धिशब्देन पदबुद्धिरुच्यते, एवञ्च पदबुद्धीनाम् अनुसंहृतिः अनुक्रमेण संहृतिः संहारः उपसंहारः, तत्र पदानि न वर्तन्ते, तानि पदबुद्धित्वेन कल्पितानि भवन्ति, पदसमूहत्वं बुद्ध्या कल्पयित्वा वाक्यं व्यवह्रियते, तादृशं वाक्यमखण्डं कथ्यते। उक्तं च हरिणा–

यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम्।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता॥

[वाक्यपदीयम्– २.३०]

शब्दस्य हि रूपद्वयं विद्यते बाह्यमान्तरिकं च। आन्तरिकं च यद्रूपं तन्मुख्यम्। आन्तरिकः शब्दः एकः अखण्डः। बुद्ध्यनुसंहृतिः आन्तरस्फोटः इति केषाञ्चन मतम्।

## २.१.७ आद्यं पदं वाक्यम्

वाक्ये प्राथम्येन उपयुज्यमानस्य पदस्य वाक्यत्वमिति अस्मिन् पक्षे वाक्यलक्षणमायाति। एवञ्च प्राथम्येन उपयुज्यमानेन पदेन अन्येषामाक्षेपः क्रियते। प्रथमं तु कारकं क्रियापदं वा प्रयुज्यते। तदनु साहचर्यात् प्रथमं प्रयुक्तं पदं स्वार्थप्रतिपादनाय पदान्तरमाक्षिपति। प्रोक्तञ्च–

विशेषशब्दाः केषाञ्चित् सामान्यप्रतिरूपकाः।
शब्दान्तराभिसम्बन्धात् व्यज्यन्ते प्रतिपत्तिषु॥

[वाक्यपदीयम्– २.१७]

## २.१.८ पृथक् पदं सर्वं साकाङ्क्षं वाक्यम्

वाक्यात् पृथक्करणे पदान्तरसाकाङ्क्षं सर्वं पदमर्थात् आद्यं मध्यमन्त्यं च समुदितं वाक्यम्। अर्थात् प्रत्येकं पदमन्योन्यसापेक्षं पृथग्वाक्यमिति भावः। देवदत्तो गामभ्याज शुक्लामित्यत्रैकैकं पदं वाक्यम्। महाभाष्ये तु प्राचीनानां मतमादाय वाक्यलक्षणं प्रोक्तम्–'आख्यातं साव्ययकारकविशेषणं वाक्यम्' इति। अव्ययकारकविशेषणैर्युक्ता क्रिया वाक्यम्। अथवा अव्ययेन विशेषणेन कारकेन च युता क्रिया। कारकविशेषणेन सह आख्यातं तिङन्तं वाक्यं भवति यथा 'मृदु पचति स्थाल्यां तण्डुलम्' इत्यत्र तण्डुलमिति कारकं पचतीति क्रिया। अव्ययविशेषणेन सह उदाहरणं यथा 'उच्चैः पठति', 'नीचैः पठती'ति वाक्ये उच्चैरिति अव्ययम्, पठतीति क्रिया। नागेशभट्टास्तु भिन्नं मतं प्रदर्शयन्ति अत्र, तेषां मते इदं लौकिकमेव वाक्यलक्षणमिति। आख्यातपदेन अत्र क्रियाप्रधानो लक्ष्यते, तेन त्वया शयितव्यम् इत्यत्र तिङन्तस्य वाक्यत्वव्यवहारवत् 'तिङ्ङतिङः'(अष्टाध्यायी–८.१.२८) इति सूत्रे तिङ्ग्रहणात् सूत्रकारस्य पचति भवतीत्येतत्साधारणं लौकिकमेवाभिप्रेतम् इति तस्य मतम्।

नवीनानां मतमादाय महाभाष्ये प्रोक्तम्– 'एकतिङ् वाक्यमि'ति। वाक्ये मुख्यं तिङन्तं पदमेकमेव स्यात्। एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमूहः इति पूर्वमतस्य तात्पर्यम्।

तेन ’पचति भवति’, ’पश्य मृगो धावति’, ’ब्रूहि ब्रूहि देवदत्त’ इत्यादौ क्रियापदस्यानेकत्वेऽपि नैकवाक्यत्वहानिः। एकसंख्या समानवचनः इति अत्र मन्तव्यमिति कैयटः। अन्यथा ब्रूहि ब्रूहि देवदत्त इत्यादौ वाक्यत्वाभावात् आमन्त्रितनिघातः न सिद्ध्येत्। एतत्सर्वं शास्त्रीयं पारिभाषिकं वाक्यलक्षणम्। तेन एकतिङन्तं वाक्यं भवति। तस्मात् ‘पचति भवति’, ‘पश्य मृगो धावति’ इत्यादीनामपि वाक्यत्वं जायते। वाक्यपदेन वार्तिकमपि लक्ष्यते। अयं भ्रमः मीमांसकेषु वैयाकरणेषु च समानतो दृश्यते यत् जैमिनिलक्षणं प्राचीनमीमांसकाः लौकिकं वदन्ति, नव्याः कौमारिलास्तु शास्त्रीयं निगदन्ति। एवं व्याकरणेऽपि भर्तृहरिप्रभृतयः वार्तिककारोक्तं लक्षणं शास्त्रीयं वदन्ति, नव्याः नागेशभट्टादयः लौकिकं वदन्ति। भोजकैयटप्रभृतयः वाक्यस्य वार्तिककारोक्तं पारिभाषिकमेव वाक्यलक्षणं स्वीचक्रुः। तस्मात् कात्यायनकृतं वाक्यलक्षणमेव अपूर्वमिति तद् स्वीकार्यम्, नागेशोक्तं च नात्र सङ्गच्छते। तस्मादेव वाक्यकारं वररुचिमिति प्रसिद्धिः।

वचेर्ण्यति ‘चजोः कु घिण्यतोः’ इति कुत्वे प्रक्रियायां च वाक्यमिति। व्याडिविरचितं वाक्यलक्षणं लौकिकमिति तु सर्वैः स्वीकृतम्। तल्लक्षणं च पदसङ्घातजं वाक्यमिति। न्यासकारः हरदत्तोऽपि प्राह ‘एकार्थः पदसमूहो वाक्यमि’ति। वाक्यलक्षणविषये यद्यपि भर्तृहरिणा साक्षात्किमपि लक्षणं नोक्तं तथापि निरवयवशब्दरूपं वाक्यमिति तस्याभिप्रायः इति पुण्यराजः वाक्यपदीयटीकायाम् अभिप्रैति। ‘सुप्तिङ्चयो वाक्यं क्रिया वा कारकान्विता’ इति अमरसिंहः। एवं लक्षणद्वयं प्रथमं शब्दात्मकं सुप्तिङ्चयो वाक्यम्, द्वितीयमर्थात्मकं क्रिया वा कारकान्विता वाक्यं भवति। ‘स्वार्थबोधसमाप्तेः पदसमुदाये वैयाकरणाः वाक्यत्वमिच्छन्ति’ इति वाचस्पत्ये प्रोक्तम्। ‘परस्पराभिसम्बद्धः पदसमुहो वाक्यमि’ति वृद्धा इति शब्दकल्पद्रुमे प्रोक्तम्।

## २.२ मीमांसकमतम्

मीमांसकाः श्रोत्रग्राह्याः वर्णा एव शब्दाः इति वदन्ति। तेषामेव वाचकत्वमर्थात् अर्थप्रत्यायकत्वम्। ते च शब्दाः कण्ठताल्वाद्यभिघातजन्याः नित्या विभवश्च। ते च वर्णा एव समुदिताः पदवाक्यव्यपदेशभाजः भवन्ति। जैमिनिः मीमांसकसूत्रे वाक्यलक्षणं प्रोक्तवान् ‘अर्थैकत्वाद् एकं वाक्यं साकांक्षं चेद् विभागे स्यात् ’(मीमांसासूत्रम्–२/१/४६)। अर्थात् यः च एतावान् पदसमूहो यस्य नियतः कश्चित् एवार्थो भवेत् विश्लेषे च यस्य पदं साकांक्षं भवेत् तद्वाक्यम् इति। इदमपि जैमिन्युक्तं लौकिकं वाक्यलक्षणम्।

## २.३ नैयायिकमतम्

वर्णा एव समुदिताः पदवाक्यभावमापन्नाः अर्थप्रत्यायकाः भवन्ति इति नैयायिकाः। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। "संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते" इति न्यायभाष्ये प्रोक्तम्। न्यायलीलावत्यामपि "किं तर्हि प्रातिपदिकं क्रमवद्वर्णसंहतिरिति ब्रूमः"। न्यायमञ्जर्यामपि "वर्णसमूहो पदम्, पदसमूहो वाक्यम्" इत्युक्तम्। 'मिथः साकांक्षशब्दस्य व्यूहो वाक्यमि'ति जगदीशः। 'पदसमूहो वाक्यमर्थसमाप्तौ' इति न्यायभाष्यकारः। 'वाक्यं पदसमूह' इति तर्कसंग्रहे। 'वाक्यं त्वाकाङ्क्षायोग्यतासन्निधमतां पदानां समूहः' इति तर्कभाषायाम्। तार्किकाः सुबन्तसमूहः तिङन्तसमूहः सुप्तिङन्तसमूहः इति विभागं कुर्वन्ति।

## २.४ आलंकारिकमतम्

आलंकारिकैरपि वाक्यलक्षणं व्यधायि। आलंकारिकेषु विश्वनाथस्य वाक्यलक्षणं च अतिप्रसिद्धम् लोके। तच्च 'वाक्यं स्यात् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः'। भोजेन अपि वाक्यलक्षणविचारे बहुधा प्रयतितम्। "वयं त्वेकार्थपरः पदसमूहो वाक्यमित्येव प्रतिजानीमहे। तत्र पदैरपि वाक्यमारभते वाक्यैरपि च प्रकरणमारभत" इति तेन अभिहितम्। 'विभक्त्यन्तं पदं वाक्यमि'ति चन्द्रालोके।

एवं लौकिकवाक्यलक्षणे प्रायः सर्वत्र पदसमूहस्यैव वाक्यत्वं स्वीकृतम्। आकाङ्क्षायोग्यतासत्तितात्पर्याणि च वाक्यार्थबोधे सहकारिकारणानि।

एतानि स्थलानि विहाय अन्यत्रापि भारतीयशास्त्रेषु वाक्यविमर्शः विचारितः विद्यते परं प्रबन्धविस्तरभयात् तत्सर्वं न विचार्यते।

## २.५ पाश्चात्यमतम्

इदानीन्तने भाषाविषयकसन्दर्भे कस्यचिद्विचारस्यैव पूर्णोच्चारणं वाक्यमित्युच्यते इति पाश्चात्यपरम्परा।

"A Sentence is a word or a set of words revealing an intelligible purpose. And a Sentence is an utterance which makes just as long as communication as the speaker has intended to make before giving himself a rest."

"Sentence is that after which silence seems best."

"A Sentence is a complete and independence human utterance, the completeness and independence shown by its standing along

of being uttered itself." [३]

पाश्चात्त्यविद्वान् रसेल् तु आख्यातपदघटितस्यैव पदसमूहस्य वाक्यत्वं कथयति। चैत्रो ममार इत्येव वाक्यं सम्भवति न तु चैत्रस्य मृत्युरिति वाक्यं तन्मते। येन किञ्चिदुद्दिश्य किञ्चिद्विधीयते तदेव वाक्यमिति तस्य वाक्यलक्षणाभिप्रायः। सर्वं वाक्यं क्रियया परिसमाप्यते इति शाब्दिकमतस्यैव चर्वणमनेन कृतमिति नैतत् नूतनं तत्त्वम्।

## ३. विमर्शः

पदसमूहो वाक्यमिति वाक्यलक्षणं प्रायः सर्वैः भारतीयविद्वद्भिः पाश्चात्यपण्डितैश्च स्वीकृतम्। 'वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति साहित्यदर्पणोक्ते वाक्यलक्षणे एव धृतादराः भूयांसो विद्वांसः। वैयाकरणनिकाये वाक्यलक्षणविषये बहूनि मतानि विद्यन्ते। तेषां मतं तु भाषाविज्ञानानुसारि निदुर्ष्टञ्च। परं शास्त्रीयक्षेत्रे वैयाकरणोक्तं वाक्यलक्षणं बहुधा विचारितम्। शास्त्रातिरिक्तक्षेत्रे अपि इदं वक्तुं न शक्यं यत् भारतीयशास्त्रं केवलं शास्त्रीयलक्षणनिरूपणे एव प्रवृत्तमिति, कारणं शास्त्रातिरिक्तं लौकिकमपि लक्षणं प्राच्यपरम्परायां निगदितम्। वैयाकरणनिकाये मीमांसकसम्प्रदाये यद्यपि किं शास्त्रीयं लक्षणं किं वा लौकिकमिति विषये वैमत्यं विद्यते तथापि एकस्य शास्त्रीयत्वस्वीकारेऽपरस्य लौकिकत्वं तु स्वतःसिद्धम्। वस्तुतस्तु साकङ्क्षपदसमूहो वाक्यमिति लौकिकं वाक्यलक्षणं स्वीक्रियते।

## ४. उपसंहारः

अद्यत्वे भाषाविज्ञानमिति सर्वत्र जगति शब्दायमानं यत् तत्त्वं तत्तु भारते आवैदिककालात् प्रचलदस्ति। भारतीयपरम्परायां भाषायाः वैज्ञानिकमध्ययनं दार्शनिकमध्ययनं च प्राचीनकालात् प्रवर्तते। पाश्चात्यविद्वत्समाजे तु अष्टादशशताब्दीतोऽस्य आरम्भो जातः। भारतीयशास्त्रीयपरम्परायां वेद-प्रातिशाख्य-शिक्षा-निरुक्त-व्याकरणग्रन्थेषु भाषाविषयको गहनो विचारो दृश्यते। भाषामादाय वेदे सूक्तयोऽपि विद्यन्ते। वाक्यविज्ञानात्मिका पाणिनेरष्टाध्यायी अपूर्वा कल्पना वाक्यसंरचनायाम्। पाणिनेरपि वाक्यादेव शाब्दबोधः इति पक्षे एव धीः। किञ्च भारतीयशास्त्रीयपरम्परायां प्रायः सर्वत्र दर्शनेषु अन्यत्रापि च सूत्रसिद्धान्तः अत्यन्तं व्यापृतोऽस्ति। सूत्रसंगठनपद्धत्या

[३] Otto Jespersen, The philosophy of Grammar by p.–307

अपि वाक्यस्य माहात्म्यं सुदृढं जायते। पाणिनेरष्टाध्याय्यां प्रायः सर्वत्रैव वाक्यविज्ञानविषये आदरो दृश्यते। विशिष्य कारकसमासादिषु एकैकस्यापि वाक्यस्य तथा शुद्धत्वाशुद्धत्वादिविचारः दृश्यते यच्च प्रायः पाश्चात्यपरम्परायां नास्त्येव। अद्यत्वे तु प्राच्याः अपि पण्डिताः पाश्चात्त्यमतेषु एव धृतादराः भवन्ति। परं भाषाविज्ञानमिति विषयस्तु वस्तुतः भारतीयशास्त्रसंलिप्तः। पाश्चात्त्यैः प्रायः भारतीयमतमादाय व्याख्यापद्धतिः निर्णीयते क्वचित् तद्विरुद्धमेव च। एवञ्च भाषावैज्ञानिकी भारतीयपरम्परा अत्यन्तं समादृता परिपूर्णा समृद्धा च इति तु निर्विवादसिद्धम्।

## परिशीलितग्रन्थसूची -


१. *तर्कसंग्रहः(प्राचीननवटीकोपेतः)*; अन्नम्भट्टः; श्रीसत्कारी शर्मा (सम्पादकः); वाराणसी : चौखम्बा संस्कृत संस्थानम्; २०००।

२. *भाषाविज्ञान एवं भाषाशास्त्र*; कपिलदेवः द्विवेदी; वाराणसी : विश्वविद्यालय प्रकाशन; २०१०।

३. *शब्दशक्तिप्रकाशिका*; जगदीशः; वाराणसी : चौखम्बा प्रकाशन; २००७।

४. *न्यायमञ्जरी* (*पञ्चममाह्निकम्*); जयन्तभट्टः; कलिकाता : संस्कृत वुक डिपो; २००८।

५. *महाभाष्यम्*; पतञ्जलिः; गुरुप्रसाद शास्त्री (सम्पादकः); नबदेहली : राष्ट्रियसंस्कृतसंस्थानम्; २००६।

६. *वाक्यपदीयम्* (*पुण्यराजकृतप्रकाशसंवलितं हरिवृषभकृतवृत्तिसंवलितं नारायणहिन्दीसमेतम्*); भर्तृहरिः; हरिनारायणः तिवारी (सम्पादकः); वाराणसी : चौखम्बा; २०१५।

७. *शृङ्गारप्रकाशः* ; भोजराजः; जि. आर जोशार(सम्पादकः); मैसूर : कोरोनेशन मुद्रणालयः; १९५६।

८. *न्यायलीलावती*; वल्लभाचार्यः; हरिहरः शास्त्री(सम्पादकः); वाराणसी : चौखम्बा सीरीज आफिस; १९९२।

९. *साहित्यदर्पणः(लक्ष्मटीकोपेतः)*; विश्वनाथः; कृष्णमोहन शास्त्री(सम्पादकः); वाराणसी : चौखम्बा संस्कृत संस्थान; २०११।

१०. *A History Of Indian Literature*; Winternitz; Calcutta: University of Calcutta; 1927.


✶ ✶ ✶

# न्यायवैशेषिकदर्शने तन्त्रयुक्तिविमर्शः

**लक्ष्मीनारायण-राउ***

प्राचीनभारते नवनवोन्मेषशालिन्या प्रतिभया बहुविधं विषयमाश्रित्य बहुविधानि शास्त्राणि विरचितानि। परन्तु यथेच्छं शब्दार्थप्रयोगेन साधु शास्त्रं न भवेत्। तदर्थं केचन नियमाः काश्चन रीतयश्चाश्रीयन्ते। ता रीतयः पुनः युक्तिग्राह्याः। एवं युक्तिग्राह्याणां शास्त्र-रचनानां निकषो हि तन्त्रयुक्तिरिति विद्वांस आमनन्ति। तत्तन्त्रयुक्तिजातमेव अविशेषतया विबुधैः दर्शनागमव्याकरणादिशास्त्रव्याख्यानावसरे उपायीभूतत्वेन साधनमिति मुक्तकण्ठं निर्विवादं जेगीयते। यद्यपि तन्त्रशब्देन सामान्यतः सर्वं शास्त्रमेव बोध्यते तथापि शब्दोऽयं विशेषसाधनशास्त्रार्थे हि प्रयुज्यते। चरकसंहितासुश्रुतसंहिताष्टाङ्गहृदयाद्यायुर्वेदादिग्रन्थेभ्यो हि तन्त्रशब्दस्य शास्त्रार्थः स्फुटः। किञ्च अर्थशास्त्रे पञ्चदशाधिकरणे अतिविस्तारेण द्वात्रिंशत् तन्त्रयुक्तयो व्याख्याताः कौटिल्याचार्येण। सिद्धान्तलक्षणे न्यायसूत्रकारेण गौतमेन प्रयुक्तस्तन्त्रशब्दः शास्त्रार्थः। वस्तुतो विस्तारार्थक-तन्-धातोः त्रल्-प्रत्ययद्वारा निष्पन्नेन तन्त्रशब्देन परस्परसम्बन्धयुक्तार्थानाम् उपदेशमूलकं शास्त्रं परामृश्यते। युक्तिशब्दस्त्वत्र उपायवाची। न हि एताः युक्तीः प्रत्याख्याय शक्यते तन्त्रं प्रणेतुम्।

एवं तन्त्रयुक्तिविषये नैयायिकानामपि आसीत् परमवधानमित्यस्मिन् विषये नास्ति कापि विप्रतिपत्तिः, यतो हि सूत्राक्षरतयानुल्लिखितापि तन्त्रयुक्तिरियं भाष्यकारैः वात्स्यायनाचार्यैः 'परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः' इति स्वगिरा स्वीकृता। तथाहि जयन्तभट्टीयन्यायमञ्जर्यां वैशेषिकसूत्रेषु तद्भाष्येषु च सानुसन्धानं पर्यालोचनद्वारा प्रतिपादिता इयं तन्त्रयुक्तिः। तथाहि अधस्तावद्यावतीनां तन्त्रयुक्तीनां विशदालोचनं समुपस्थाप्यते–

## अतिक्रान्तावेक्षणम्

पूर्वप्रतिपादितविषयस्य पुनर्निर्देश एवातिक्रान्तावेक्षणम्। न्यायशास्त्रेऽस्य सापेक्षत्वं दरीदृश्यते। तथाहि भाष्यकृता वात्स्यायनेन न्यायशास्त्रस्य पञ्चमाध्याये शब्दार्थयोः सम्बन्धस्योपपत्तिः प्रतिपादिता। तथाहि 'यत्तदवोचाम अस्येदम्' इति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः सम्बन्ध इति समयं तमवोचाम इति निगदितं

---

* सहायकाध्यापकः, संस्कृतविभागे, मौलाना-आजाद-महाविद्यालयः

भाषाकारेण वात्स्यायनेन। अतिक्रान्तावेक्षणरूपां तन्त्रयुक्तिं प्रयुज्य पुनरुक्ति-दोषपरिहारः सुकर इति जयन्तभट्टेन निगद्यते। तथाहि तेनालोच्यते- 'निरवयववाक्यार्थवादश्च प्रागेव विस्तरेण निरस्त इत्यलं पुनरुक्तालापेन'[१] इति।

**अतिदेशः**

अतिदेशो नाम एकस्यान्यत्रारोपः। अनया च तन्त्रयुक्त्या विषयवस्तुनः कस्यचित् धर्ममुपवर्ण्य तदन्यत्रारोप्यते। कस्यचिद् विषयस्य वर्णनानन्तरं तद्द्वारेणैव अनुक्तविषयस्यावगमनार्थं या पद्धतिः सैवातिदेशतन्त्रयुक्तिरिति चरकसंहिताटीकाकृतः चक्रपाणिदत्तस्य मतम्। वेदविहितप्रकृतिविकृतियागकर्मसु अतिदेशरूपायास्तन्त्रयुक्तेः परं सापेक्षत्वं दृश्यते। तद्व्याख्याप्रसङ्गादेव जयन्तभट्टेनोपदेशातिदेशयोर्मिथो वैलक्षण्यं प्रतिपादितम्। उपदेशानुसारेण कार्यविधिरुपदेशे प्रवर्तते, अतिदेशे च कार्यानुसारमुपदिश्यते इति तयोः पार्थक्यम्। तथाहि विषयेऽस्मिन् "नन्वेवमुभयत्र तदवगमाविशेषादुपदेशातिदेशयोः को विशेषः? न नियोगावगमे कश्चिद्विशेषः, किन्तूपदेशे, यथोपदेशं कार्यमतिदेशे तु यथाकार्यमुपदेश इत्येव तयोर्विशेषः"[२] इति जयन्तभट्टीयमतमनुसन्धेयम्।

**अनागतावेक्षणम्**

पश्चादेवं विहितमित्यनागतावेक्षणम्। 'परं वक्ष्यते' इत्येवं प्रकारेण न्यायदर्शनव्याख्यानां बहुस्थलेषु अनागतवेक्षणतन्त्रयुक्तिः प्रयुज्यमाना दरीदृश्यते। यथा– 'एकमेव वस्तु अर्थद्वयप्रतिपादकं भवितुमर्हति' इत्येतत् परं प्रतिपादयिष्यते इति न्यायवार्त्तिके निर्दिश्यते। तुल्यतयैव प्रथमाध्यायेऽर्थापत्तेः पृथक्प्रमाणत्वेन निराकरणं न प्रतिपादितम्। किन्तु तद् द्वितीयाध्याये निरूपयिष्यत इति न्यायवार्त्तिकतात्पर्यटीकायामभिमतत्वेन प्रकाशितम्। 'अपवर्गाह्निके च विस्तरेण अवयवी साधयिष्यत इत्यास्तामेतत्'[३] इति प्रत्यभिज्ञास्वरूप-निरूपणावसरे जयन्तभट्टेन पद्धतिरियं प्रयुक्ता। वैशेषिकसूत्राणां व्याख्यायामपि सुवर्णस्य तैजसत्वनिरूपणे मङ्गलविघ्नध्वंसयोश्च सम्बन्धप्रतिपादने अनागतावेक्षणस्य सापेक्षत्वं कीर्तितम्। तथाहि विषयेऽस्मिन् 'साधयिष्यते सुवर्णस्य तैजसत्वमिति' इति

---

[१] न्यायमञ्जरी (नवम आह्निकः) पृ.- ४१

[२] तत्रैव, पृ.– २४६

[३] तत्रैव, पृ.– ७४

वाक्यम् अनुसन्धेयम्।

**अनुमतम्**

निजशास्त्रे परमताङ्गीकारे या रीतिः पद्धतिर्वा तदनुमतमिति संज्ञापितं भाष्यकृता वात्स्यायनेन। शास्त्रान्तरे स्वीकृतं मनस इन्द्रियत्वं न्यायशास्त्रेऽपि स्वीकरणीयम्। विरोधितामनादृत्य परमतग्रहणमेव अनुमताख्यायास्तन्त्रयुक्तेः कार्यम्। सुश्रुतकौटिल्याभिमते अनुमतलक्षणेऽपि पूर्वोक्ततत्त्वमेव प्रतिध्वन्यते। तथाहि विषयेऽस्मिन् 'परवाक्यमप्रतिषिद्धमनुमतम्' इति कौटिलीयमतं तथा 'परमतमप्रतिषिद्धमनुमतम्' इति सुश्रुतमतम् अनुसन्धेयम्।

**अपदेशः**

विषयेऽस्मिन् अमुना एतन्निगदितमित्येवं प्रकारेण तद्वचनोद्धृतिरेव अपदेशपदवाच्यत्वं लभते। कस्यापि विषयस्य याथातथ्येनोपस्थापने यदपरिहार्यत्वेन हेतुः कारणं वापेक्ष्यते तदेव भाष्यकारेणानेकत्र सूत्रकारस्य वाक्यव्याख्यानावसरे निर्देशितम्। इदमत्रावधेयं यत् सूत्रकारेण हेत्वपदेशयोः समानार्थकत्वमुररीकृतम्। तथाहि सूत्रं– 'हेतुरपदेशो लिङ्गप्रमाणं करणमिति अनर्थान्तरम्' इति। तस्मादेव कारणात् स्वसिद्धान्त-प्रतिष्ठायै सूत्रकारेण स्वयमपि बहुषु अपदेशाख्यायाः तन्त्रयुक्तेरुपयोगः कृतः। यथा संशय-परीक्षावसरे पञ्चानां हेतुवाक्यानां व्यवहारो विहितः सूत्रकारेण। किञ्च, अर्थापत्तेः प्रमाणान्तरत्वनिराकरणमपि अपदेशव्याख्यानकाले सूत्रकारेण विहितम्। वैशेषिकसूत्रे पुनः तावत् हेत्वर्थेऽपदेशपदं व्यवहृतम्। किं बहुना, विपरीतज्ञानवतामव्युत्पन्नानां वा जनानां निश्चितार्थप्रतिपत्तये परार्थानुमानाख्या पद्धतिराश्रीयते। इदञ्च परार्थानुमानं पञ्चावयवात्मकम्। ते च पञ्चावयवाः प्रतिज्ञा, अपदेशः, निदर्शनम्, अनुसन्धानम्, प्रत्याम्नायश्च। द्रव्यात्मना वायोः प्रतिपत्तये पूर्वोक्तपञ्चावयवैरनुमानमपेक्ष्यते इति प्रशस्तपादभाष्ये प्रतिपादितम्। तथाहि तत्रोक्तं– "पञ्चावयवेन वाक्येन संशयित-विपर्यस्ताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयम्। अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः"[४] इति।

**योगः**

योगाख्या तन्त्रयुक्तिरित्युक्तौ पदयोजनप्रक्रिया परामृश्यते न्यायदर्शने।

[४] प्रशस्तपादभाष्यम् पृ.– १६६-१८२

वाक्ययोजना हि योगः। यथा– 'अर्थावधारणं निर्णयः' इति लक्षणमात्रस्य योगः कर्तव्यः 'इन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षे भवति' इति वाक्येन सहेति उपदिश्यते भाष्यकारेण। न्यायवार्त्तिकतात्पर्यटीकायामपि कुत्रचिद् विपरीतार्थग्रहणं योगपद्धत्या स्वीक्रियते।

**अपवर्गः**

व्यापकतया प्रयुक्तविधेः व्यपकर्षणं संकोचनं वा अपवर्गः। सामान्यतो यद्यपि उक्तविषयात् अंशविशेषच्युतिरूपा अपवर्गाख्या तन्त्रयुक्तिः व्यपदिश्यते तथापि तदर्थे तच्छब्दे च न्यायोऽयं न्यायभाष्ये न्यायवार्त्तिके च व्यवह्रियते। तन्त्रयुक्तिरियं न्यायशास्त्रे न्यायदर्शने अपवादनाम्ना आख्यायते। जयन्तभट्टीयोक्तावपि अपवादस्य प्रयोगबाहुल्यं दृश्यते।

**अर्थापत्तिः** यया पद्धत्या अनुल्लिखितविषयस्यार्थः प्रतिपद्यते सा अर्थापत्तिः तन्त्रयुक्तिरुच्यते। तथाहि निगदितं– 'यदनुक्तमर्थादापद्यते सार्थापत्तिः' इति। प्राचीनन्याय-शास्त्रे अर्वाचीनन्यायशास्त्रे चार्थापत्तेरुपयोगो बहुत्र संलक्ष्यते। वात्स्यायनेन स्पष्टत एवोक्तं यत् अर्थाद् आपत्तिः प्राप्तिः प्रसङ्गो वा सा अर्थापत्तिरिति। यथा– असति मेघे वृष्टिर्न भवति, इत्यस्मादर्थात् मेघे सत्येव वृष्टिर्भवतीत्यर्थ आपद्यते। प्रसङ्गान्तरे तैर्निगदितं यत् कस्यचिदर्थस्य सम्प्रयोगात् अतिरिक्तार्थप्रतीतिर्या जायते सा अर्थापत्त्यैव सम्भवति। यद्यपि अनुमाने अर्थापत्तेरन्तर्भावः नैयायिकैरभिमन्यते तथापि नैयायिकानामेके स्वमत-प्रतिष्ठापनार्थम् अर्थापत्तिरूपतन्त्रयुक्तेरुपयोगं कृतवन्तः। वृत्तिकारेण विश्वनाथाचार्येणापि भणितं यदर्थापत्तिस्तावद् उक्तेनानुक्तम् आक्षिपति। तदुक्तं वृत्तौ– 'शब्दोऽनित्य इत्युक्तेऽर्थादापद्यते अन्यन्नित्यम्...। कृतकत्वाद् अनित्य इत्युक्तेऽर्थाद् आपन्नम् अन्यस्माद्धेतोर्नित्यः...'[५] इति। तथा च उद्द्योतकरेणापि अर्थापत्त्यधिकरणसिद्धान्तयोरभेदनिरूपणप्रसङ्गे कथितं यदर्थापत्त्योक्तेन वाक्येन तद्विपरीतवाक्यार्थप्रतीतिर्जायते। पुनश्च, वाक्यानुषङ्गी योऽर्थः सोऽधिकरण-सिद्धान्तः। तदुक्तं न्यायवार्त्तिके 'वाक्यार्थप्रतिपत्तौ तद्विपरीतवाक्यार्थप्रतिपत्तिरर्थापत्तिः वाक्यानुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्तः'[६] इति। आचार्येण वाचस्पतिमिश्रेणापि अर्थापत्तिरियं स्वीकृता स्वमतप्रतिपत्तये। तदुक्तं न्यायवार्त्तिकतात्पर्यटीकायां–

[५] न्यायदर्शनम् (भाष्यवार्त्तिकतात्पर्यटीकावृत्तिसहितम्), सम्पा. अमरेन्द्रमोहनतर्कतीर्थः, श्रीतारानाथन्यायतर्कतीर्थः – ५/१/२१

[६] तत्रैव, पृष्ठा- २६९

'पीनो देवदत्तो दिवा न भुङ्क्ते इत्यस्य दिवाभोजननिषेधोऽर्थः, तस्माद्विपरीतरात्रिभोजनविधिरर्थापत्तिः लोकसिद्धा'[७] इति। शब्दस्य नित्यत्वानित्यत्वनिरूपणे शब्दनित्यतायां तु अर्थापत्तेः सापेक्षत्वं जयन्तभट्टेनानुभूतम्। तथाह्युच्यते न्यायमञ्जर्यां– 'शब्दनित्यतायामर्थापत्तेरेव प्रमाणत्वम्।

तस्मादनित्यतासिद्धिर्नैवं प्रायैरसाधनैः।
शब्दस्य नित्यतायान्तु सैषार्थापत्तिरुच्यते॥[८] इति।

न्यायकन्दल्यामपि कथितं यत् दृष्टश्रुतार्थयोरुपपत्तये उपायान्तराभावात् या अर्थान्तरकल्पना सैवार्थापत्तिः। तथाह्युच्यते– 'दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थान्तरकल्पनार्थापत्तिः'

## उद्धारः/प्रत्युत्सारः

शास्त्रकृद्भिरभिमतासु तन्त्रयुक्तिषु उद्धारः आन्यतम्यं बिभर्त्ति। प्रतिपक्षयुक्तौ दोषप्रदर्शनपूर्वकं स्वपक्षस्थापनं शास्त्रविचारस्यान्यतमा दिक्। निग्रहस्थानं व्यतिरिच्यापि हेत्वाभासस्य पृथग्वर्णनं किमर्थं कृतमिति तदर्थं प्रथमतया वृत्तिकारेण प्रतिपक्षदोषं समुद्भाव्य स्वसिद्धान्ते निग्रहस्थानापेक्षया हेत्वाभासः पृथक्तया वर्णितः। सूत्रकारेण शास्त्रादौ मङ्गलं नाचरितमिति कारणात् मङ्गलस्याप्रामाणिकत्वं यैरभिमन्यते तेषां मतमपि वृत्तिकारेण खण्डितम्। वस्तुतस्तावत् उद्धाराख्यस्तन्त्रयुक्तेरुद्देशं पद्धतिञ्च न्यायशास्त्रीयवादेन सादृश्यमस्तीति वक्तुं शक्यते। तथाहि विषयेऽस्मिन् वैशेषिकदार्शनिक-व्याख्यानुसन्धेया। वादस्य दार्ढ्यप्रतिपादनार्थं तन्त्रयुक्तेः ज्ञानं परं सापेक्षमिति सुश्रुतोक्त्या स्पष्टमवगन्तुं शक्यम्। तथाहि तैरुक्तम्–

असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः॥ इति।

## उपमानम्

उपमानं तावत् तन्त्रयुक्तिषु आन्यतम्यं भजते। दृष्टविषयद्वारा अदृष्ट-विषयस्य सिद्धिर्येन जायते सा उपमानाख्या तन्त्रयुक्तिरिति कौटिल्याभिमतम्। तथाह्युक्तं– 'दृष्टेनादृष्टस्य साधनमुपमानमि'ति। इयमेव तन्त्रयुक्तिः न्यायशास्त्रे उपमानमिति स्वतन्त्र-प्रमाणत्वेन स्वीक्रियते।

---

७ तदेव

८ न्यायमञ्जरी पृ.- २८९

तथापि 'प्रसिद्धसाधर्म्यात् साध्यमुपमानम्' इति सूत्रम्, 'प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानम्' [९] इति च भाष्यम्।

## उद्देशनिर्देशौ

कस्यचिद्विषयस्य समासेन कथनं वैशद्येन प्रतिपादनञ्चेति शास्त्ररचनाया अन्यतममङ्गम्। एतावेव यथाक्रमम् उद्देशनिर्देशौ परामृश्यौ। वस्तुतः 'समास-वाक्यमुद्देशः', 'व्यासवाक्यं निर्देशः' चेति। न्यायशास्त्रे तावत् न केवलं तयोः प्रयोग एव कृतोऽपि तु तत्र तयोर्यादृशं लक्षणं कृतं तद्वारा तत्रापि तन्त्रयुक्तेरेव साधर्म्यं परिलक्ष्यते। तथाह्युक्तं न्यायभाष्यवार्त्तिके– 'नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः' [१०] इति।

अवितथतत्त्वार्थनिर्णयाय न्यायशास्त्रस्य शैली तावत् प्रतिपाद्यपदार्थानां क्रमत उद्देशलक्षणपरीक्षा। नाम्ना वस्तुसंकीर्तनमुद्देश इति भाष्यकारस्य वात्स्यायनस्याभिमतम्। संक्षेपविस्तरनाम्नापि उद्देशनिर्देशयोर्भाष्यकारेण बहुत्र प्रयोगः दृश्यते। सूत्रकारेण गौतमेनापि षोडशपदार्थानां नामोल्लेखपूर्वकं वैशद्येन प्रत्येकं पृथक् व्याख्यानं कृतम्। न्यायभाष्यवार्त्तिकेऽपि नामतः प्रतिपाद्यवस्तुसङ्कीर्तनमुद्देशत्वेन परामृश्यते। तथाहि अस्मिन् प्रसङ्गे तत्रत्यमतमनुसन्धेयं– 'गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टम्। उद्देशश्च नियोग-विकल्पसमुच्चयैः समानः' [११] इति।

## उपदेशः

आप्तजनस्योक्तिरुपदेशाख्या तन्त्रयुक्तिरभिमन्यते। अर्थशास्त्रे तल्लक्षणं निगदितम्– 'एवं वर्तितव्यमित्युपदेशः' इति। पूर्वोक्तानुसारमेव वात्स्यायनोऽपि अनुरूपलक्षणमाह– 'प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दा-प्रशंसोपपत्तेः' इति सूत्रम्, 'लौकिकस्तावदपरीक्षकोऽपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्यं चरेति। कुत एवमृषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति? ...उपदिष्टार्थविज्ञाता चोपदेशविषयः' [१२] इति च भाष्यम्। आप्तजनस्य अनुशासनमाधारीकृत्यैव न्यायशास्त्रस्य भित्तिः दृढीभूता। सूत्रकारेण गौतमाचार्येणापि स्पष्टं निगद्यते यत् आप्तोपदेशेन जागतिकपदार्थानां बोधो

---

[९] न्यायदर्शनम् (प्रथमः खण्डः) पृ.–१८४
[१०] न्यायभाष्यवार्त्तिकम् पृ.– २५
[११] तत्रैव, पृ.- ३७१
[१२] न्यायदर्शनम् (चतुर्थः खण्डः) पृ.– ३३७-३३८

जायते। तथाहि प्रसङ्गेऽस्मिन् 'आप्तोपदेशसामर्थ्याच्छब्दार्थ-सम्प्रत्ययः'[१३] इति गौतमीयं सूत्रमनुगन्तव्यम्।

**ऊह्यम्**

ऊहाख्यतन्त्रयुक्त्या तावत् शब्दतोऽनुक्तोऽप्यर्थो बुद्ध्या सम्प्राप्यते। ऊह्यं नाम अनुक्तकरणम्। ऊहाख्यन्यायस्य प्रतिफलनं दृश्यते तावत् तर्कस्य लक्षणे- 'अविज्ञाततत्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः'[१४] इति। ईश्वरसिद्ध्यर्थं गौतमेन यत् सूत्रद्वयं प्रणीतं तत्र अनुमानप्रक्रिया तद्दृष्टान्तश्च ऊहेन लभ्याविति निर्दिष्टं विश्वनाथेन। न केवलमेतदपि तु बुद्धिशुद्धये वादप्रक्रियायाम् अस्योपयोग इति जयन्तभट्टोऽप्याह। विषयेऽस्मिन्- 'ऊहोऽत्र तर्क उच्यते नानुमानम्। तत्त्वज्ञानार्थताप्यस्य प्रमाणानुग्राहकत्वेन न साक्षात् तथैव चार्थं साधयितुमेष वादे प्रयुज्यते हृदयशुद्धिप्रकाशनार्थम्'[१५] इति जयन्तभट्टीयमतमनुसन्धेयम्।

**एकान्तैकान्तिकौ**

स्वविषयतज्जातीयविषयान्तरयोरुभयत्र यो नियमः प्रयुज्यते वात्स्यायनेन सोऽनैकान्तिक आख्यायते। शब्दकर्मबुद्ध्यादीनां नित्यत्वनियमस्याव्याप्तत्वाद् वात्स्यायनेनास्य प्रयोगो दर्शितः। पक्षत्वेन सर्वं वस्तु नित्यं मन्यते चेत् तत्र कदाचित् नित्यता स्यात् नापि स्यात् इत्यतः व्युत्पत्तिगतमर्थं प्रदर्श्य अनेकान्तस्य सिद्धान्तः कृतो वाचस्पतिमिश्राचार्येण।

**निदर्शनदृष्टान्तौ**

उदाहरणयोगेन विषयस्य सारल्येन बोधनमेव निदर्शनस्य कार्यम्। निदर्शनं दृष्टान्त इति अनर्थान्तरम्। दृष्टान्तो दृष्टान्तयुक्तो निदर्शनम्। पदार्थबोधने सौकर्यात् निदर्शनस्य स्वतन्त्रपदार्थत्वं स्वीक्रियते न्यायशास्त्रे। मूर्खपण्डितयोरुभयोरेव तुल्यतया बुद्धिगोचरीभूतं दृष्टान्तं चक्रपाणिदत्तः निदर्शनाख्यां तन्त्रयुक्तिमाह। गौतमीयवचस्यापीदं प्रतिध्वन्यते- 'लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः'[१६] इति। शास्त्रे तावत् दृष्टान्तविरोधात् प्रतिपक्षो निराक्रियते, पुनश्च दृष्टान्तस्यानुकूल्यात्

[१३] तत्रैव (द्वितीयः खण्डः), पृ.- २८४

[१४] तत्रैव (प्रथमः खण्डः), पृ.- ३४४

[१५] जयन्तभट्टः, न्यायमञ्जरी(एकादश आह्निकः) पृ.- ११०

[१६] न्यायदर्शनम् (प्रथमः खण्डः), सम्पा. फणिभूषणतर्कवागीशः, पृ.- २६६

स्वपक्षसमर्थनमपि कर्तुं शक्यम्। विषयेऽस्मिन्– 'यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि, सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति, दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति' [१७] इति भाष्यमतमनुसन्धेयम्।

## नियोगः

तन्त्रयुक्तिं स्वीकुर्वाणेन आचार्यगणेन आवश्यकतया कस्यचित् कार्यस्य विधानं नियोग इत्युक्तम्। न्यायवार्त्तिके तावद् विधिव्याख्यानावसरेऽपि नियोगस्यास्य तात्पर्योपलब्धिः कर्तुं शक्या। तथाहि– 'यद्वाक्यं विधत्ते इदं कुर्यादिति स नियोगः' इति वचनं विषयेऽस्मिन् अनुसन्धेयम्। 'एवं कर्तव्यम्' इत्येवं वाक्यमेव उद्योतकरनये नियोग आख्यायते। अन्यस्थलेऽपि नियोगव्यवहारे कौटिल्यप्रोक्तस्य नियोगलक्षणस्योपयोगः परिलक्ष्यते। तथाहि कौटिल्यप्रोक्तं लक्षणं तावत्– 'एवं नान्यथेति नियोगः' इति।

## निर्वचनम्

गुणतः शब्दनिष्पत्तिर्हि निर्वचनमिति। तद्धि निर्वचनं तन्त्रयुक्तिषु ऐकतम्यं याति। न्यायशास्त्रे निर्वचनस्य महान् प्रभावः परिलक्ष्यते। यद्यपि सूत्रकृता गौतमाचार्येण तद्विषये किमपि न व्याख्यातं तथापि भाष्यकारेण वात्स्यायनेन प्रत्यक्षादि-संज्ञानिरूपणवेलायां निर्वचनस्योपयोगः समर्थितम्। तथाह्युच्यते– 'प्रत्यक्षानुमानोपमान-शब्दाः प्रमाणानि' इति सूत्रम्, 'अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्' [१८] इति च भाष्यम्।

## पूर्वपक्षनिर्णयौ

पूर्वपक्षं खण्डयित्वा स्वमतमण्डनं भारतीयदार्शनिकपरम्परायामेका अपरिहार्या दिक्। तत्र निजमतस्थापना निर्णयतन्त्रयुक्तिमन्तरेण न सम्भवति। गौतमीय-न्यायसूत्रेऽपि पक्षान्तरे दोषोद्भावनपुरःसरं विनिश्चितार्थस्थापनमेव पूर्वपक्षनिर्णयाख्य-तन्त्रयुक्तिः परामृश्यते। तथाहि– 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' इति गौतमीयं सूत्रम्। चाणक्येनापि उच्यते यत् 'प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः' इति।

## प्रयोजनम्

---

[१७] तदेव

[१८] न्यायदर्शनम् (प्रथमः खण्डः) पृ. ८५

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति श्लोकवार्त्तिकोक्त्या प्रयोजनमन्तरेण न कस्यापि पुरुषस्य कस्मिन्नपि कर्मणि प्रवृत्तिर्जायते। तस्मादेव कारणात् कर्मादौ शास्त्रादौ वा प्रयोजनकथनमवश्यं कर्तव्यम्। अतो न्यायशास्त्रे प्रयोजनं पृथक् प्रमेयपदार्थत्वेन स्वीक्रियते। गौतमप्रणीतप्रयोजनलक्षणे तन्त्रयुक्तेस्तात्पर्यं संलक्ष्यते। तथाहि सूत्रितं– 'यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्'[१९] इति। असति प्रयोजने स्तोके वा प्रयोजने विद्यमाने शास्त्रविचारस्य आनर्थक्यं प्रसज्यते इति– 'एवं प्रकारभेदोदाहरण-वर्णनमल्पप्रयोजनमिति न प्रस्तूयते'[२०] इति जयन्तभट्टीयोक्तौ स्पष्टम्।

**प्रसङ्गः**

पूर्वं यो विषयः प्रतिपादितो विषयान्तरे पुनः तत्कथनं प्रसङ्गाख्या तन्त्रयुक्तिरित्युच्यते। प्रकारान्तरेण समानोऽर्थो हि प्रसङ्ग इति। उद्योतकरेणैवं प्रकारेण पूर्वप्रतिपादितविषयस्य वर्णनावसरे प्रसङ्गशब्दो व्यवहृतः।

**वाक्यशेषः**

वाक्यशेषतन्त्रयुक्त्या वाक्यांशे कथितेऽपि व्याख्यानवेलायाम् अनुक्तार्थलाभो जायते। अध्याहारप्रक्रिया तावद् वाक्यशेषस्य अवश्यप्रयोज्या पद्धतिः। येन वाक्यं समाप्यते स हि वाक्यशेष इति। वाक्यशेषमुपयुज्य इच्छाद्वेषादीनां गुणत्वनिरूपणम् आत्मसिद्धिश्च कृते उद्योतकरेण।

**विकल्पः**

तन्त्रयुक्तिषु विकल्पस्तावदन्यतमः। अनेन वानेन वेति विकल्प इति। परमाणोः निरवयवत्वसाधकगौतमीयन्यायसूत्रे 'वा'शब्दप्रयोगात् वैकल्पिकविधिः सूच्यते। तथाहि– 'परं वा त्रुटेः' (४.२.१७), 'आकाशासर्वगतत्वं वा' (४.२.१९) चेति सूत्रद्वयं तत्प्रमाणं दृढीकरोति। विश्वनाथाचार्यैस्तावत् तत्र वैकल्पिकार्थस्ततोऽपि सुस्पष्टतया प्रतिपादितः।

**विधानम्**

शास्त्रस्य प्रकरणानुपूर्वी विधानमिति। न्यायशास्त्रस्य प्रणेत्रा गौतमेनापि प्रकरणानुपूर्वी यथायथं संस्थाप्य प्रमेयपदार्था निरूपिताः। तथाहि प्रथमसूत्रादौ प्रमाणम्, तदनन्तरं प्रमेयम्, तदनन्तरं संशयः,

---

[१९] तत्रैव, पृ.- २६४

[२०] न्यायमञ्जरी (एकादश आह्निकः) पृ.– १३६

तदनन्तरं प्रयोजनमित्येवमानुपूर्व्या पदार्था निरूपिताः। जयन्तभट्टेनापि न्यायसूत्रसमूहस्य पर्यालोचनायां विधानं क्रमो वानुसृतम्।

**विपर्ययः**

प्रतिलोमेन साधनं हि विपर्ययः। यः प्रतिपाद्यविषय उपदिश्यते तद्विपरीतार्थबोधो विपर्ययतन्त्रयुक्त्या सम्भवति। विपर्ययाख्यतन्त्रयुक्तिं प्रयुज्य वात्स्यायनेन आदौ मिथ्याज्ञानस्य प्रकृतिं तत्फलञ्च वर्णयता तद्वारैव तद्विपरीतार्थतत्त्वज्ञानं प्रतिपादितम्। तदुच्यते 'तत्त्वज्ञानं तु मिथ्याज्ञानविपर्ययेण व्याख्यातम् (१.१.२)' इति। विपर्ययम् आधारीकृत्यैव भाष्यकारेणेवोद्योतकरेणापि समवायसम्बन्धाश्रयो युक्त्या प्रतिपादितः। विपर्ययतन्त्रमनुसृत्यैव सूत्रकारेण संक्षिप्ततया न्यायशास्त्रीयसिद्धान्तप्रतिपादकं सूत्रजालं प्राणायि। तथाहि साध्यस्य साधर्म्यात् तद्धर्मभावी यो दृष्टान्तः प्राप्यते तदुदाहरणमिति कथयित्वा तद्विपर्ययात् साध्यस्य वैधर्म्ययुक्तदृष्टान्तस्यापि उदाहरणत्वं प्रतिपाद्यते– 'तद्विपर्ययाद्वा विपरीतम्' इति (१.१.३७) गौतमीयसूत्रेण।

**संशयः**

तन्त्रयुक्तिषु आन्यतम्यं बिभ्रतः संशयस्य अर्थशास्त्रप्रोक्तं लक्षणं तावत्– 'उभयतो हेतुमानर्थः संशयः' इति। अस्मिन् सिद्धान्ते नास्ति कस्यचित् विपश्चितो विप्रतिपत्तिर्यत् संशय एव ज्ञानचर्चाया जनक इति। तन्त्रयुक्तित्वेन संशयो यथा परामृश्यते एवमेव न्यायशास्त्रे प्रमेयपदार्थत्वेनापि तस्य परामर्शः क्रियते गौतमाचार्येण। तत्त्वनिर्णयावसरे व्याख्यातॄणां नैके संशयपुरःसरं पूर्वपक्षमुद्भाव्य स्वस्वसिद्धान्तेषु उपनीताः। पदार्थस्य निश्चितज्ञानाभाव एव संशयस्य स्थलत्वेन कीर्त्यते। विषयेऽस्मिन् 'तत्र संशयस्तावद्वस्तुरूपानवधारणात्मकः प्रत्ययः' इति वाक्यमनुसन्धेयम्। स्थाणुर्वा पुरुषो वेति उभयधर्मविशिष्टत्वेन संशयो ज्ञानविषयो भवति। तस्मात् संशयः अयथार्थज्ञानत्वेन नैयायिकैः स्वीक्रियते।

**समुच्चयः**

किञ्चिद् वस्तु अविरुध्य वस्त्वन्तरग्रहणं क्रियते समुच्चयाख्यया तन्त्रयुक्त्या। वस्तुतोऽनेन चानेन वेति समुच्चय उच्यते। भाष्यकारेण वात्स्यायनेन विषयद्वयं समुच्चयप्रयोगादेकत्र हेतुरूपेणोपन्यस्तम्। तथाहि– 'न सङ्कल्पनिमित्तत्वाच्च रागादीनाम्' इति सूत्रम्, 'कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति

समुच्चयः'[21] इति च भाष्यम्। सूत्रकारस्य 'वा'शब्दप्रयोगः समुच्चयार्थकत्वं द्योतयतीति भाष्यकारेण निगदितम्। 'तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव' इत्यादिसूत्रस्थचशब्दस्य समुच्चयार्थकत्वं स्वीकृत्य द्रव्यादिसाधर्म्यज्ञानेन साकं धर्मस्य निःश्रेयसहेतुत्वमपि संयोजितं व्याख्याकृद्भिः।

अन्तिमे एतदुक्तव्यं यत्, सुनिर्दिष्टनियमाभावाद् यथा सूत्ररचना सुसंहतरूपेण न भवति तथा तद्भाष्यटीकाव्याख्याटीप्पणीनिर्माणं भावोपस्थापनञ्चापि सुरीत्या न सङ्गच्छते। अथ समग्रग्रन्थान्तर्गतप्रतिपाद्यविषयेषु पौर्वापर्यसङ्गतिरक्षार्थमेतास्तन्त्रयुक्तय आश्रयणीया इत्यलं विस्तरेण।

## परीशीलितग्रन्थसूची


१. *न्यायमञ्जरी*; जयन्तभट्टः; गौरीनाथशास्त्री (सम्पादकः); वाराणसी– सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; १९८२

२. *न्यायदर्शनम्*; फणिभूषणतर्कवागीशः; कलिकाता– पश्चिमवङ्गराज्यपुस्तकपर्षत्; १९८१

३. *प्रशस्तपादभाष्यम्* (भाष्यानुवादविवृत्तिन्यायकन्दलीसहितम्); प्रशस्तपादः; श्रीश्यामापदन्यायतर्कतीर्थः तथा दण्डिस्वामिदामोदराश्रमः (सम्पादकः); कलिकाता– आद्यापीठबालकाश्रमः; १९७४

४. *न्यायभाष्यवार्त्तिकम्*; भारद्वाजोद्द्योतकरः; अनन्तलालठक्कुरः(सम्पादकः); कलिकाता– भारतीयदार्शनिकानुसन्धानपरिषत्; १९९७


✶ ✶ ✶

[21] न्यायदर्शनम् (चतुर्थः खण्डः) पृ.- ४०८

# Cultural life as reflected in ViṣṇuSmṛti

**Anusrita Mandal***

## Introduction -

The cultural life of the Indians is documented in different historical and literary sources. Sanskrit literature is one such valuable source marked by its ancientness and richness. Indians use the Sanskrit word *'sanskṛti'* or *'kṛṣṭi'* as a synonym for the English word 'culture'. According to the Oxford English Dictionary, the word 'culture' has the following connotations: a way of life; art or music or literature; beliefs or attitudes; growing or breeding etc.[i] Culture, as found in our society, is dynamic and idealistic. In the aftermath of the advent of the Vedic literature and culture, *smārta* literature or *dharmaśāstra* flourished as a code of conducts, dealing mainly with the idea of dharma. *Yājñavalkya* mentions twenty names of the *dharmaśāstrakāras*. Although undeniable primacy and priority of Manuis found in the various quotations of the *smṛtikāras*, the existence of other *smṛtigranthas* proves that Manu is not the end. An important example, in this case, is the *dharmaśāstrakāra* known as *Viṣṇu*.[ii] As would be seen, *Viṣṇusmṛti* is not confined to dealing with the means of knowing dharma. It has 100 chapters. A Banaras *paṇḍit*, Nanda, was the first to write a commentary on the *Viṣṇusmṛti* (1622), named as *'vaijayantī'*. The most interesting part of *Viṣṇusmṛti* is that it combines both the prose and *śloka* style. According to J. Jolly, it must have been composed in Kashmir.[iii] According to Patrick Olivelle, it was composed probably sometime between the 6th to 8th centuries CE.[iv] The earliest iconographic record of the text from Kashmir, dating back to 7th CE, contains the description of the earth as located

---

* Assistant Professor, Surendranath College

i Oxford advanced learner's dictionary, p. 370

ii *Manvatriviṣṇuhārītayājñavalkyośanoṅgirāḥ*
*yamāpastambasaṁvartāḥkātyāyanabṛhaspatī.*
*Parāśaravyāsaśaṅkhalikhitādakṣagoutamau*
*śātātapovaśiṣṭhaścadharmaśāstraprayojakāḥ. Yājñavalkya Smṛti* 1.4-5

iii The Institutes of Vishnu, p.xv

iv The law code of *Viṣṇu*, Introduction, p.15

between the feet of *Viṣṇu*.[v] P.V.Kane and J. Jolly agree that the final version of *Viṣṇusmṛti* is a *Vaiṣṇava* recast[vi] of the ancient *dharmasūtra* of the *Kāṭhaka* branch by a *Viṣṇu* devotee. The geographical sections like the 85th chapter is extensively informative, and instead of dealing with deal with any lawit describes the pilgrimages. Most of these, spread across all parts of India, are sacred to *Viṣṇu* and *Śiva*. It is really not possible to analyse the whole cultural life as mentioned in the *Smṛti* in a short paper. Instead, this paper is an attempt to discuss some selected aspects of cultural life as described in the *Viṣṇusmṛti*.[vii] Whereas throughout the whole text the cultural life is presented in a random manner, this paper analyses the issue by dividing it into five components, by way of using the Indian method called *sthālīpulākanyāya*.

**Food and drink -**

The food and drink of a region and the method of preparing them have a direct impact on its culture. Men learnt to cook food with the progress of civilization. The terms like bhojana[viii], *āśana*[ix]were used for meal or food-related matter. There are frequent references of boiled rice (*pakvānna*[x]) which is considered the staple food of that period. Mention is made of non-edible andedible food as well as drinks (*abhakṣya*[xi] bhojya, *pāna*).[xii] Various kinds of food as found in the text includesugar, sour-milk, milk, butter-milk, salt, clay, ashes,birds, fish, clarified butter, oil, meat, honey, basketwork, and canes of bamboo.[xiii] There are descriptions of thieves who used to steal cooked or

v The date and provenance of the Vishnu smriti: on the intersection between text and iconography, p. 150

vi The law code of *Viṣṇu*, Introduction, p. 5

vii https://reviewout.files.wordpress.com/2012/08/vishnu-smriti.pdf [last accessed 19.09.2018, 6.34 p.m.]

viii The law code of *Viṣṇu*, 5.95

ix Ibid, 19.15

x Ibid, 5.84

xi Ibid, 5.98

xii Ibid, 90.12

xiii Julius Jolly, The Institutes of Vishnu, 5.83-8, p. 33

dressed food.[xiv] There were penalties for such stealing. Even for stealing flowers, green grain, shrubs, creepers, climbing plants or leaves, a person had to pay five *Kṛṣalas* as the penalty. The same punishment was ordained for stealing pot-herbs, roots, or fruits.[xv] This indicates that a section of the contemporary population was poor. Due to poverty, they had to steal cooked food because they didn't have the facility to prepare food. In the present time, wasting food has become a major problem worldwide. Now scholars are giving suggestions regarding what we can do to stop wasting of food. In this context, this text offers an innovative policy not to waste food to maintain the ecology. It says, he who does not eat, though he has received and accepted an invitation, shall give gold *Māṣaka* as a fine. In addition, he has to give the double amount of food to his host.[xvi] Probably people of this *smṛti* age desired to create a world where nobody should stay hungry. Food played a major role in daily life. The question of impurity was there and a *brāhman* was prohibited from eating meat.[xvii] In the context of *piṇḍadāna*, meat was to be offered with rice, curd, ghee and honey.[xviii] In the eightieth chapter, the text prescribes the variety of meat to be used for ancestors in *śrāddha* which will make them happy. It seems a few people were generally vegetarians except on the occasion of *śrāddha* and sacrifices, especially when meat was served instead of other food like yava etc. The 80th chapter has given the following list concerning meat:

| By offering | Ancestor will be happy |
|---|---|
| Sesamum(tila), rice(brīhi), barley, water, roots, fruits, vegetables, śyāmākagrain, wild rice, kidneybeans,wheat(godhūma) | 1 month |
| flesh of fish | 2 months |
| flesh of deer | 3 months |

xiv *Annāpahāryāmayāvī*, vishnu smriti, 45.11

xv *Puṣpaharitagulmavallīlatānāmapaharaṇepañcakṛṣalān, śākamūlaphalānāṁca*, ibid, 5.85-86

xvi Ibid, 5.95-97

xvii *amāṁsāśanāśca*, ibid, 19.15

xviii The law code of *Viṣṇu*, p.81

| | |
|---|---|
| flesh of sheep | 4 months |
| flesh of Bird meat | 5 months |
| flesh of goat | 6 months |
| flesh of the spotted deer | 7 months |
| flesh of the spotted antelope | 8 months |
| Beef | 9 months |
| Buffalo's meat | 10 months |
| flesh of a hornless goat | 11 months |
| milk of a cow | 12 months or 1 year |

On this subject there exists a stanza, which states pot-herb (*Kālaśāka*), prawn (*Mahāśalka*), flesh of the crane (*Vārdhrīṇasa*), and a rhinoceros without horn are those food which we always accept.[xix] Here, the text also accommodates animal birds as well as other creatures. If anybody killed the village or domestic animal (*grāmyapaśu*) or forest animal (*araṇyapaśu*) he had to be punished.[xx] More interestingly, a phonetic etymology is given for the word *māṁsa* (meat). It implies that me (*māṁ*) he (sa) will eat in the next world or life.[xxi] Some related concepts emerge out of this. There is the concept of good food and evil food determined by some conditions like time, place, immunity power, health etc. Although a vegetarian diet had been a measure of spiritual progress but society was very much accustomed to non-vegetarian food as well. There are common fruits mentioned in the *Smṛtilike* vilva, *āmalakaetc*[xxii]. Fishes were also utilized as food. Five kinds of fish are mentioned in this context as being particularly popular.[xxiii] These *arepāṭhīna*, *rohita*, *rājīva*, *siṁhatuṇḍa*,

xix *Kālaśākaṁmahāśalkaṁmāṁsaṁvārdhrīṇasasyaca Viṣāṇavarjā ye khadgāāsūryaṁtānaśāmahe.* ibid, 80.14

xx Ibid, 5.50, 52

xxi *Māṁsabhakṣayitāmutrayatramāṁsamihādmyahaṁ.* ibid, 51.78

xxii Ibid, 99.12

xxiii Ibid, 51.21

*andśakula*. Among the varieties of drinks, water was the main sustenance of life. Both hot and cold water were used in daily life[xxiv]. The text advises us to drink water boiled with *kuśa* grass, leaves of *palāśa*, udumbara, lotus, banyan, *śaṁkhapuṣpī*, and *brahmī*[xxv]. Even the imperishable or inexhaustible[xxvi] water is mentioned there as *akṣayyodaka*[xxvii]. *Paňcagabya*[xxviii] was used as healthy drink. The habit of drinking liquor was very much known to the people from the Vedic period. The art of distillation of liquors also must have been well known to the people. As a result we find two varieties of intoxicant like *surā* (3 types) and madya (10 types) [xxix]. Both are different in nature. Three kinds of *surā*[xxx] are *Gaudī* (made from sugar), *Mādhvī* (honey probably fermented) and *Paiṣṭī* (made from rice). Ten kinds of madya[xxxi] are *Mādhūka* (made from madhuka flowers), *aikṣava*(made from *ikṣu* fruit), *Tāṅka* (made from kapittha or wood apple), *kaula* (made from jujube fruit), *khārjura* (made from date fruit), *pānasa* (made from jack fruit), *mṛdvikārasa* (from grapes), *mādhvīka* and *maireya* (both were different liquor prepared from honey), *nārikelaja* (from cocoanut). Abstinence from liquor was always related with a pious and saintly life and is considered so even now.

## Different Professions -

The duty of a king to look after the proper administration of justice included the task that he should select an Astrologer[xxxii]

---

[xxiv] Ibid, 46.11-22
[xxv] Ibid, 46.23
[xxvi] The law code of *Viṣṇu*, p. 81
[xxvii] Ibid, 21.4
[xxviii] Ibid, 22.78
[xxix] Ibid, 22.77
[xxx] Ibid, 22.82
[xxxi] Ibid, 22.83
[xxxii] Ibid, 3.75

and a Priest in his court. Priest would have to be well versed in the Vedas, History, laws, and so on. As many asfourteen fields of knowledge (*vidyāsthānas*) were covered. In addition to this, the profession of the Physician[xxxiii] is realistically portrayed in the *ViṣṇuSmṛti*. It is risky for anyone to live in a place where the medical facility is not available. The text mentions that a person must not live in a kingdom in which there are no physicians[xxxiv]. Regarding disease and medical treatment, it is also mentioned that a person of privileged class requires a physician's faultless application of medical knowledge. Even punishment is prescribed for the physician for adopting a wrong method of cure.[xxxv] However, the doctor seems impure in this law code. Even in distress also if a person is offered food by a physician, carpenter, leather worker, hunter etc. then he is prescribed of fasting for three days[xxxvi]. The usual way of expressing it is to declare that the doctors are intrinsically impure human beings[xxxvii]. The idea that 'prevention is better than cure' – a common saying of these days – was propounded in this text so early. It suggests that by giving honey, ghee, oil, a person obtains good health as the same is also obtained by giving medicines. It seems there might be highly herbal plants or product which can be used as gift. These are used for multiple medical purposes. Freedom from illness is described as *ārogya*[xxxviii] which is acquirable through various actions. He, who does not have meat, is also sad to enjoy immunity from disease[xxxix]. The particular word *vyādhi* occurs for disease.

---

[xxxiii] Ibid, 5.175-177, 51.10, 71.66
[xxxiv] *nasāṁvatsaravaidyahīne*, Ibid, 71.66
[xxxv] *Bhiṣaṁmithyācarannuttameṣupuruṣeṣu*, Ibid, 5.175
[xxxvi] ibid, 51.8-11
[xxxvii] Science and Society in Ancient India, p. 213
[xxxviii] Ibid, 78.30
[xxxix] *Nabhakṣayatiyomāṁsaṁvidhiṁhitvāpiśācavat*

Overall the disease has shown as suffering due to any kind of sinful action (*karmaviśeṣeṇa*) in the last life[xl]. For example, if someone was born with the problem of dyspepsia it meant that person was a thief in the last life[xli]. The 45th chapter shows bodily manifestation of sins or mark of sins. Here the theory of karma works rigidly in the society.

In the context of debt, a set of occupations existed and people were known variously as herdsman, distiller of spirits[xlii], public dancer[xliii], washer man, hunter etc.[xliv] A hypocrite, a singer[xlv], trainer of dogs, an oil manufacturer, a carpenter, a leather manufacturer, jailer, a seller of weapons, have a dis-honourable profession (*Abhiśasta*[xlvi]). These were considered undesirable by the next tradition also.

**Dress and decorations -**

*Viṣṇu Smṛti* is basically a text of code of conducts. In spite of that, it contains suggestions regarding a variety of dresses. From leaf and grass man progressed to bark and from that on to cloth. Deer skin (*Ajīna*), turban (*uṣṇīṣa*[xlvii]) gold, silver and gems were used. Sandal wood and others used as a product of perfume[xlviii]. In the same context, three types of scent are discussed, namely, scentless, strong smelling and sweet scented. Skins (of antelopes, ropes, woven cloth, fans made of

*salokepriyatāṁyātivyādhibhiścanapīḍyate.* Ibid, 51.73

xl Ibid, 45.32-33

xli Ibid, 45.11

xlii Liquor marchants, Patrick Olivelle, The law code of *Viṣṇu*, p. 64

xliii Actor, Ibid,

xliv Julius Jolly, The Institutes of Vishnu, 5.83-8, p. 33, 6.37

xlv The law code of *Viṣṇu*, 51.7

xlvi Ibid, 51.6-16

xlvii *Uṣṇīṣālaṁkāramaṇikanakarajatavastrāsanayānāmiṣāṁāśca* ibid, 63.32

xlviii *Candanakuṅkumāgurukarpūramṛgamadajātīyaphalavarjamanulepana-ṁnadadyāt* Ibid, 66.2

bamboo, thread, cotton, and clothes) which have only just come from the manufactory, or which are dyed with saffronand will not admit of washing for that reason, are mentioned with the description of how these are to be cleaned[xlix].The three terms *Kaṣāyi*, *pravrajita*, *malina*[l] refer to members of religiousorders seems clear, but it may be doubted whether malina denotes the *Pāśupatasor kāpālika* according to commentator[li], and even whether *pravrajitā*[lii] denotes the Buddhists (female), as dresses dyed with *kaṣāya* are worn by Brahmanical sects also, and prescribed for students. The acquaintance of the text editor or author with the Buddhistic system of faith is proved by two other *sūtras*[liii] where the commentator refers to a certain class of deities in the Buddhistic system of religion[liv]. The whole subject of good and evil omens is not treated in any otherancient *Smṛti*. On the other hand, such terms as *vedanindā*, *asatśāstrābhigamanam*, *nāstikatā*[lv] recur in most *Smṛtis*, and can hardly refer to the Buddhists in particular. Few chapters seem also to be spurious due to *Viṣṇuitic*, or traceable in modern works.

**Art and aesthetics -**

The text contains general information on song, dance and musical instrument. Lyre (*bīṇā*[lvi]) was popular musical instrument of that period. It prescribes an interesting area of

xlix *Dhānyājinarajjutāntavavaidalasūtrakārpāsavāsasāṁca*, ibid, 23.14

l *Kāṣāyipravrajitapatitamalināṁśca*, ibid, 63.36

li *ViṣṇuSmṛtiwith* the commentary *Keśavavaijayantī* 63.36

lii The law code of *Viṣṇu*, 36.7

liii *Mahārājika, caturmahārājika, Vishnu smriti* 98.40-41

liv The Institutes of Vishnu, p. 294,

lv The law code of *Viṣṇu* 37.4, 30, 31

lvi *Bīṇācandanāyudhārdragomayaphalapuṣpārdraśākagorocanādūrvāpra-rohāṁśca.* ibid, 63.30

game with snake[lvii] which should not be played anywhere, anytime with anyone. It denotes a group of people were there who were not afraid with snake rather it became there sport of daily life.

**Paradoxical concepts -**

*Viṣṇusmṛti* itself is a mixed product of both ancient and medieval period. Vedic rituals are described as the concepts of *satī* and *Viṣṇu* worship are also referred to. Also, the dietary habits of the *brāhman* apparently differed from the *non-brāhman*, even though the *brāhman* consumed meat in some conditions. The text mentions that the *brāhman* must not eat the flesh of beasts or animals, which has not been consecrated with Mantras or rituals, but if it has been consecrated, he may eat it, following the eternal law of the Vedas.[lviii] Dialogues are nothing but conversation being expressed in languages. Here the style evolves from the story of the *Purāṇa* Goddess *lakṣmī* who tried to acquire knowledge by way of asking questions. *Viṣṇu* answered almost all the queries. From that conversation it is proved that some intellectual traditions of Indian philosophy were common to people. Among those were *āstikadarśna* (mainly *sāṁkhya*, yoga, dvaita and *vaiṣṇavism* flourished), and *nāstikadarśna* (*cārvākajaina* and bauddha philosophy were there). The social condition is clearly presented by the coexistence of a beggar and a rich man[lix]. Even the concepts of loaner[lx] or debtor[lxi] were prominent. It helps to understand trade and commerce in conjunction with a wide range of socio-economic conditions as well. It proves the structural, mix

---

lvii *nasarpaśastraihkrīḍet*, ibid, 71.78

lviii Ibid, 51.59

lix *dhanikacchanatahkriyā*, ibid, 6.42

lx Ibid, 7.13

lxi *ṛṇikastaṁpratibhuvedviguṇaṁdātumarhati*| ibid, 6.43

and scattered culture was followed in the both societies.

**Conclusion -**

The text therefore reflects the contemporary society and culture. It mentions some topics of special characteristics like robbery, distillation of liquor, gems science, agriculture, poetry etc. It portrays, to a large extent, the social structure, norms and restrictions followed and accepted by the people in their everyday life. Hence the students, administrator, businessman, laborer or monks all were governed by duties. The natural diversity of the daily life comes alive through the *sūtras*. On the one hand it deals with various kinds of sins including concepts of hell and rebirth; on the other hand, it describes penances for each type of sin. It may be stated that a unique cultural amalgamation of the diverse people and sect of the ancient and medieval India is thereby evoked. *Viṣṇusmṛti* thus regulates the mutual obligation of the individual and the society as it constitutes the foundation of all affairs through practices. The path may differ occasionally but it works for the sake of mankind sometimes for narrow interests of some.

**Bibliography -**


1. *Manusamhitā*; Manabendu Banerjee; Kolkata: Sanskrit Pustak Bhandar; 1419 (Bengali year).
2. *Science and Society in Ancient India*; Debiprasad Chattopahyaya; Calcutta: Research India Publication; 1979 (Reprint).
3. *ViṣṇuSmṛti with the commentary Keśavavaijayantī* (Volume- I, II); Pandita Nanda; (Ed.) V. Krishnayamacharya; Madras: The Adyar library and research centre; 1964.
4. *The Institutes of Vishnu* ( Volume- 7); Julius Jolly (Trans.); Oxford and Clarendon press, sacred book of East; 1880.
5. *The Institutes of Vishnu* (together with Extracts from the Sanskrit Commentary of Nanda Pandit called Vaijayanti); Julius Jolly (Ed.); Calcutta: The Asiatic Society; 1881.

6. *History of dharmaśāstra*; P. V. Kane.; Poona: Bhandarkar Oriental Research Institute; 1968.
7. *Hindū Dharmaśāstra*; Pushpendra Kumar (Ed.); Delhi: Nag Publishers; 2011.
8. *The date and provenance of the Viṣṇu Smṛti, Indologica Taurinensia*; Patrick Olivelle; 33. 2007. 149–163.
9. *The law code of Viṣṇu* (A critical edition and annoted translation of the VaiṣṇavaDharmaśāstra); U.S.A.: Harvard University Press, 2009.
10. *Parāśara smṛti* ( Volume I, II, III.); Chandrakanta Tarkalankara (Ed.); Kolkata: The Asiatic Sciety; 1973-1974.
11. *YājñavalkyaSmṛti*; Pañcānana Tarkaratna (Ed.); Kolkata: Sanskrit PustakBhandar; 1398 (Bengali year).
12. *Oxford Advanced Learner's Dictionary of Current English* (8th edition); Oxford University press; 2010.


✶✶✶